श्रीकृष्णायमनः ॥ अथ भगवतो मथुराप्रवेशं वर्णयति ॥ अथेति-गद्येन॥अथ सः श्रीकृष्णः शनैःशनैः राजपथं मथुरासंबंधिनं राजमार्गं अवजगाहे प्रविष्टोऽभूत् ॥ कीदृशः सः ॥ गोपडिंभैर्गोपालबालकैः परिपूरितप्रांतभागः सर्वतोवेष्टितइत्यर्थः ॥ कीदृशैर्गोपडिंभैः ॥ विविधेति ॥विविधान्यनेकविधान्यंबराणि वस्त्राणि माल्यानि मालाः ॥ माल्यं मालास्रजावित्यमरः ॥ आभरणान्यलंकाराश्च तेषां भरेण परिष्कृतैरलंकृतैः ॥ अतएव ॥ विजृंभितेति ॥ विजृंभितं प्रसृतं यदामोदयोर्द्वयं सौगंध्यहर्षरूपं तेन परिकलितैर्युक्तैः ॥ तथा ॥ परित्यक्तेति ॥ परित्यक्तः सुखदः गोपतेर्नंदस्य यो गोगणो धेनुसमूहस्तत्संबंधी व्यापारश्चारणादिरूपो यैस्तैरपि ॥ सुखदेति ॥ सुखदो यो गोपतिगोनिचयस्तेनाऽभिमृष्टाः स्पृष्टाः विग्रहा येषां तैरिति विरोधाभासः ॥ परिहारस्तु सुखदः सायंकालिकत्वेन मंदत्वात्सुखदाता यो गोपतेः सूर्यस्य गोनिचयः किरणसमूहस्तेनाऽभिमृष्टाः स्पृष्टा विग्रहा देहा येषां तैरिति ॥ स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ॥ लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः ॥ शरीरं वर्ष्म विग्रहइति च ॥ तथा॥श्रितेति ॥ श्रितः कृष्णवर्त्मा अग्निर्यैस्तैस्तथाविधैरपि तदवलोकनेन कृष्णवर्त्माऽवलोकनेन शीतलानि नयनानि हृदयानि च येषां तैरिति विरोधाभासः ॥ परिहारस्तु श्रितमाश्रितं कृष्णस्य वर्त्म मार्गो यैस्तैः॥ तस्य श्रीकृष्णस्याऽवलोकनेन शीतलानि सुखितानि नयनानि हृदयानि च येषां तैरिति ॥ तथा ॥ सशेषैरप्यशेषैरिति विरोधाभासः ॥ परिहारस्तु शेषेण शेषाऽवतारेण बलरामेणाऽन्वितैः अशेषैः संपूर्णै-





रिति ॥ पुनः कीदृशः सः ॥ सानुरागः अनुरागो दर्शनौत्सुक्यं तत्सहितः ॥ तथा ॥ यदुपुरसुंदरीभिः कर्त्रीभिः सस्मितेक्षणादिभिः समंदहासाऽवलोकनादिभिः कृत्वा अंचितः पूजितः सत्कृत इति यावत्॥कीदृशीभिर्यदुपुरसुंदरीभिः॥सौधेति॥सौधानां राजसदनानां अट्टालानि शिरोगृहाणि हर्म्याणां धनिकगृहाणामग्राणि च तेषु समारूढाभिः ॥ सौधोऽस्त्री राजसदनं ॥ हर्म्यादि धनिनां वास इति चाऽमरः ॥ तथा ॥ समुत्सृष्टेति ॥ समुत्सृष्टाः सदनसंबंधिनो गृहसंबंधिनो व्यवसायाः संमार्जनोपलेपनाऽलंकरणाद्युद्योगा याभिस्ताभिरपि ॥ समदनमिति ॥ मदनेन कामेन सहितं यथा स्यात्तथा तद्वदनदर्शने श्रीकृष्णमुखावलोकने विषये सव्यवसायाभिस्सोद्योगाभिः ॥अत्रोत्सृष्टव्यवसायत्वसव्यवसायत्वयोर्विरोधः॥ विषयभेदेन परिहारः ॥ तथा॥समुदितेति ॥ समुदिता उत्पन्ना या पर्युत्सुकता उत्कंठितत्वं उत्कंठेतियावत्॥तयाकृत्वा॥वसनेति॥वसनानि वस्त्राणि च आकल्पा भूषणानि च अंजनं च एतदादीनां या रचना तद्विषये अप्रगल्भाभिर्भगवद्दर्शनैकतानवृत्तित्वादसमर्थाभिरपि ॥ रसेति ॥ रसस्य शृंगारस्य रीतौ कटाक्षाऽवलोकनादिपरिपाट्यां प्रगल्भाभिः ॥ अत्रापि विरोधपरिहारौ पूर्ववत् ॥ पुनः कीदृशः सः ॥ तत्रत्येत्यादि ॥ तत्र मथुरायां भवानि तत्रत्यानि अनल्पानि बहूनि यानि शिल्पानि गृहादिनिर्माणकौशलानि तेषु कल्पिता आसंजिता दृष्टिर्येनसः ॥ तथा ॥ अखिलेति ॥ अखिलाः संतः साधवो ये पौरजनास्तेषु कृता कृपेक्षणरूपा कृपाऽवलोकनरूपा सुधावृष्टिर्येन स तथाविधः ॥ कंसादिव्यावृत्तये सदिति विशेषणं ॥ १ ॥

**प० ॥ मथुरामत्तकाशिन्यो धन्या नाऽन्याः क्षितौ यतः ॥ तं लावण्यसुधांऽभोधिं स्वनेत्रचषकैः पपुः ॥ १ ॥**

भगवदवलोकनेन मथुरासंबंधिस्त्रीणां धन्यत्वमाह ॥ मथुरेति ॥ क्षितौ पृथ्व्यां मथुरासंबंधिन्यो मत्तकाशिन्यो वनिताःधन्याः अन्या वनिता न धन्याः ॥ कुत इत्यत आह ॥ यतइति ॥ यतो हेतोः॥लावण्येति ॥ लावण्यं सौंदर्यमेव सुधा तस्या अंभोधिरिव उत्पत्तिस्थानं निरवधिकसौंदर्यशालिनमित्यर्थः ॥ लावण्यलक्षणं तु मुक्ताफलेषु च्छायायास्तरलत्वमिवांऽतरा ॥ प्रतिभाति यदंगेषु तल्लावण्यमिहोच्यतइति ॥ तं श्रीकृष्णं स्वनेत्रचषकैः स्वनेत्ररूपैश्च षकैः पानपात्रैः पपुः ॥ यद्वा क्षितौ इत्यस्य पपुरित्यनेन संबंधः ॥ सादरमवलोकयंति स्मेत्यर्थः ॥ १ ॥

**ग० ॥ तदात्वे तद्वृत्तांतनितांतपरिचिचीषया पृच्छंतीं सखीं काऽप्येवमवदत् ॥ २ ॥**

तदात्वेइति ॥ तदात्वे तत्काले काऽपि स्त्री ॥ तद्वृत्तांतेति ॥ तस्य श्रीकृष्णस्य यो वृत्तांतो वार्ता तस्य नितांतमत्यंतं या परिचिचीषा परिचेतुमिच्छा तया ॥ वृत्तांतः प्रक्रियायां स्यात् कार्त्स्न्ये वार्ताप्रभेदयोरितिमेदिनी ॥ पृच्छंतीं सखीं प्रति एवं वक्ष्यमाणप्रकारेण अवदत् ॥ २ ॥

**प० ॥ सुमाराऽऽनंददाताऽपि कुमाराऽऽनंददायकः ॥ श्रीमन्नंदकुमारोऽस्ति श्रीमन्नंदकुमारकः ॥ २ ॥**



तदाह ॥ सुमारेति ॥ अयं श्रीमन्नंदकुमारः अस्ति ॥ कीदृशः ॥ सुमाराऽऽनंददाता सुष्ठूत्तमो यो मारस्य मदनस्य संबंधी आनंदस्तस्य दाताऽपि ॥ कुमारेति ॥ कुत्सितो मारसंबंधी य आनंदस्तस्य दायकोदातेति विरोधाभासः ॥ परिहारस्तु कुमाराणां सनकादीनां आनंददायकइति ॥ एतेन साक्षात्परब्रह्मत्वं सूचितं ॥ यद्वा कुः पृथ्वी मा लक्ष्मीः रोऽग्निः एतेषामानंददायकः ॥ तत्र भारहरणेन पृथ्व्या यज्ञादिनाऽग्नेश्चाऽऽनंददातृत्वं लक्ष्म्यास्तु प्रियाऽऽचरणेनेत्यर्थः ॥ यद्वा कोः पृथ्व्याः मारस्य कामस्य उत्पादनपूर्वकं सांगत्वसंपादनेनाऽऽनंददायकइति ॥ तथा ॥ श्रीमतो नंदस्य कुमाराणां गोपानां च कं सुखं यस्मात्सः ॥ २ ॥

**ग० ॥ तत्र स तावन्निजराजाऽन्ववायाऽवतंसोऽयमिति धियेव द्विजवृंदैरमंदाऽऽनंदैस्तत्रतत्र पूजितोनंदनंदनो घंटापथपथिकं सानुगं कंसाऽनुगं रंजकमप्यरंजकमुपेत्येत्थंकारं गिरं सस्मितं परिससर्ज ॥ ३ ॥**

तत्रेति॥ तत्र तावत् राजमार्गेएव ॥तावदवधारणे॥स नंदनंदनः सानुगं अनुगैरनुचरैः सहितं कंसाऽनुगं कंसाऽनुचरं रंजकं उपेत्य सस्मितं यथा स्यात्तथा इत्थंकारं वक्ष्यमाणप्रकारेण गिरं वाणीं परिससर्ज॥उक्तवानित्यर्थः॥कीदृशोनंदनंदनः॥निजेत्यादि॥निजेत्यनेन द्विजाः निजराजस्य द्विजराजस्य चंद्रस्य योऽन्ववायो वंशस्तस्याऽवतंस इव शिरोभूषणमिवेति निजराजाऽन्ववायाऽवतंसश्चंद्रवंशशिरोमणिरित्यर्थः ॥ इति धियेव अमंदानंदैः अमंदो ऽनल्प

आनंदो येषां तैर्द्विजवृंदैर्ब्राह्मणसमूहैस्तत्रतत्र स्थले स्थले पूजितः॥ कीदृशं कंसानुगं ॥ घंटापथपथिकं राजमार्गगामिनं ॥ घंटापथः संसरणमित्यमरः ॥ तथा रंजकमपि रंजयत्यनुरागमुत्पादयतीति रंजकस्तमपि अरंजकमिति विरोधाऽऽभासः ॥ परिहारस्तु रंजकं रंगकारं अरंजकं कंसपक्षपातित्वेन निष्ठुरभाषित्वादनुरागाऽनुत्पादकमिति ॥ ननु रजकं कंचिदायांतमित्युक्त्या रजकमित्यपेक्षिते कथं रंजकमित्युक्तमितिचेत्सत्यं ॥ रंगकारं गदाग्रज इत्युत्तरत्र कथनादेकस्य तस्यैवोभयविधकार्यकारित्वादुभयविधव्यपदेशः॥ व्याख्यातं चैतत्श्रीधरस्वामिभिः ॥ रजको वस्त्रनिर्णेजकः ॥ स एव वस्त्राणां रंगमपि कुर्वन् रंगकार इति ॥ ३ ॥

**प० ॥ पृथ्व्याः क्षालनकर्ता जलदोऽपि स्वांऽबरस्य न त्वं तु ॥ तत्क्षालनेऽसि दक्षः श्रेष्ठस्तानि प्रयच्छ तद्रागात्॥ ३ ॥**

किमुक्तवानित्याशंक्य तदाह ॥ पृथ्व्याइति ॥ जलदः स्वतो जलदाता मेघः पृथ्व्याः क्षालनकर्ता स्वीयजलमोचनेन धावयिता सन्नपि स्वांऽबरस्य स्वाऽऽधारभूतस्यांऽबरस्य क्षालयिता न प्रत्युत मालिन्यप्रदः त्वं तु तत्क्षालने स्वांऽबरक्षालने दक्षश्चतुरः ॥ अत्रांऽबरशब्दः श्लेषेण वस्त्राऽऽकाशयोर्वाचकः अतः श्रेष्ठोऽसि तत्तस्मात्तान्यंबराणि रागात् प्रेम्णा प्रयच्छ देहि॥ अस्मभ्यमिति शेषः ॥ ३ ॥

**ग० ॥ तदानीं श्रवणस्त्रुक्स्रुतचाटुतद्वचनाज्यमिश्रणसमुद्भूतहृदयकुंडाऽधिष्ठितक्रोधज्वलनज्वाला**



**मिव स्ववदनबिलाद्गिरमेवं स समुज्जगार॥ ४ ॥**

तदानीमिति ॥ श्रीकृष्णयाचनावसरे स रंजकः स्ववदनबिलात् एवं वक्ष्यमाणप्रकारां गिरं वाणीं समुज्जगार उक्तवानित्यर्थः ॥ वदनस्य बिलत्वकथनेन तन्निःसृताया वाचः सर्पवन्मर्मवेधकत्वप्रयोजकत्वं सूचितं ॥ उत्प्रेक्षते ॥ श्रवणेत्यादि ॥ श्रवणमेव कर्णएव स्त्रुक् तस्याः स्रुतं गलितं चाटु श्लाघ्यं यत्तस्य श्रीकृष्णस्य वचनं तदेवाऽऽज्यं तस्य मिश्रणेन समुद्भूतः प्रकटः प्रदीप्त इति यावत् एवंविधः हृदयमेव कुंडं अर्थाद्रंजकस्य तस्मिन्नाधिष्ठितो यः क्रोधएव ज्वलनोऽग्निस्तस्य ज्वालामिव ॥ ४ ॥

**प० ॥ कंबलघर्षितविग्रह कंबलमाश्रित्य राजवस्त्राणि॥ इच्छसि परिधातुं त्वं रेरे कथयाऽऽशु नेत्रघृष्टकर॥ ४ ॥**

तामेवाह ॥ कंबलेति ॥ हेकंबलघर्षितविग्रह कंबलेन घर्षितो विग्रहः शरीरं यस्य तत्संबुद्धिः ॥ एतेन गोपबालकस्य तव सदा कंबलधारित्वादेतद्वस्त्रपरिधानयोग्यता नाऽस्तीति सूचितं॥तथा॥नेत्रेति ॥ रेरे नेत्रैर्गवां बंधनार्थाभी रज्जुभिर्मंथरज्जुभिर्वा घृष्टौ करौ यस्य तत्संबुद्धिः ॥ एतेन कठोरकरत्वात् सूक्ष्मवस्त्रस्पर्शेऽप्यनर्हत्वं सूचितं ॥ नेत्रं मंथगुणे वस्त्रभेदे इति मेदिनी ॥ त्वं बलं बलवंतं कं पुरुषमाश्रित्य राजवस्त्राणि परिधातुं इच्छसि आशु कथय ॥ बलं गंधरसे रूपे स्थामनि स्थौल्यसैन्ययोः ॥ पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपिच ॥ बलयुक्ते ऽन्यलिंगः स्यादिति मेदिनी ॥ ॥ ४ ॥

न समर्थस्त्रिनेत्रोऽपि नेत्रं धारयितुं यतः॥ नेत्रसं वेष्टनेच्छा चेन्नेत्रमावेष्ट्यतां प्रभो॥ ५॥

ननु स्वं बलमाश्रित्यैवेच्छामीति चेत्तत्राह ॥ नेति ॥ यतः त्रिनेत्रोऽपि साक्षाच्छंकरोऽपि प्रभोः कंसस्य नेत्रं वस्त्रं धारयितुं समर्थो न अन्येषां का कथेत्यर्थः ॥ तस्मात् ते इति शेषः ॥ नेत्रेति ॥ नेत्रेण भवदीयेनैव मंथगुणेन यत्सम्यग्वेष्टनं तस्येच्छा रज्ज्वा स्वशरीरबंधनेच्छेत्यर्थः ॥ अस्ति चेन्नेत्रं राजवस्त्रं आवेष्ट्यतां ॥ एतद्वस्त्रपरिधाने राजा त्वां रज्जुभिर्बध्नीयात् इति भावः ॥ ५ ॥

ग० ॥ एवं तद्वदनबिलवर्तिरसनापन्नगीसमुच्छर्दितवाग्विषकलुषितांऽतःकरणः शशिकुलाभरणः सः इत्थमाचचक्षे ॥ ५॥

एवमिति ॥ एवं पूर्वोक्तप्रकारेण ॥ तदिति ॥ तस्य रंजकस्य यद्वदनमेव बिलं तद्वर्तिनी या रसना जिव्हैव पन्नगी सर्पिणी तया सम्यगुच्छर्दितं वांतं यद्वागेव विषं तेन कलुषितमंतःकरणं यस्यैवंभूतः ॥ शशीति ॥ आबिभर्ति पोषयतीत्याभरणः ॥ नंद्यादित्वाल्ल्युः ॥ शशिकुलस्य चंद्रकुलस्य आभरणः पोषकः ॥ भूषणवाचकत्वे तु नित्यनपुंसकत्वादाभरणमिति स्यात् ॥ एतेनाऽमृतमयचंद्रवंशोत्पन्नत्वात्तद्वंशपोषकत्वाच्च पूर्वोक्तविषोपद्रवराहित्यं सूचितं ॥ सः श्रीकृष्णः इत्थं वक्ष्यमाणप्रकारेण आचचक्षे ऊचे ॥ ॥ ५ ॥

प० ॥ गुणिन स्सुरंजितांस्त्वं वहसे शुचिभूतपट



चयान्यदपि॥ तदपि च तद्विपरीतं विपरीतं विपरिणामिनं कुर्याम्॥ ६ ॥

तदाह ॥ गुणिनइति ॥ हेरंजक त्वं गुणिनः गुणास्तंतवः संति येषु तान् अथच गुणवतः पुरुषान् अपिच सुरंजितान् शुचिभूतपटचयान् शुद्धवस्त्रसमूहान् यदपि वहसे तदपि तथापि तद्विपरीतं उक्तविशेषणविशिष्टपटचयाऽपेक्षया विपरीतं अगुणिनं अरंजितं अशुचिभूतं तथा विपरिणामिनं विरुद्धकर्मविपाकवंतं ॥ एतादृग्विरुद्धभाषित्वान्मरणोन्मुखमित्यर्थः॥ वेरायूरूपस्य कालस्य यः परिणामो ऽवसानं तद्वंतं मरणोन्मुखमिति यावदितिवा त्वां विपरीतं विभिः मांसाशिभिः काकगृध्रादिभिः पक्षिभिः परीतं वेष्टितं कुर्यांहन्यामित्यर्थः ॥ अहमिति शेषः ॥ ६ ॥

सद्य एवं निगद्य॥ रंगे गजेंद्रमल्लेंद्रबाधा नो भविता धुना॥ इति रोषाद्द्रुतं कृष्णो रंगकारं समापयत्॥ ७॥

सद्यइति ॥ उत्तरान्वयि ॥ रंगेइति ॥ कृष्णः एवं निगद्य उक्त्वा सद्यः तत्कालं रंगकारं रंजकं द्रुतं शीघ्रं समापयत् समापितवान् मारयति स्मेत्यर्थः ॥ अत्रोत्प्रेक्षते ॥ रंगइत्यादि ॥ रंगे मल्लक्रीडास्थाने नोऽस्माकं ॥ गजेंद्रेति ॥ गजेंद्रः कुवलयाऽऽपीडः मल्लेंद्राश्चाणूरादयस्तेषां बाधा अधुना भविता इति रोषादिव चेति गम्योत्प्रेक्षा॥ रंगे बाधोदयो भावीति पूर्वमेव रंगकर्ताऽयमवश्यं हंतव्योऽन्यथा अनेकरंगोत्पत्तिसंभवादितिरोषादिवेति भावः ॥ ७ ॥

ग० ॥ ततःपरं क्षितिधरश्वसनाऽशनदर्शनसंजात

साध्वसतया पलायमानान् स्वस्वामिप्राणश्वस
नान् शीघ्रं परिग्रहीतुमिव तदनुजीविनस्तदवलो
कनभयबंधुरैः स्वस्वामिप्राणसमीरैरपि समीरि
ता इव द्रुततरमात्तगंधतया पलायनमूरीचक्रुः॥
॥ ६ ॥

ततइति॥ततः परं रंगकारहननानंतरं तदनुजीविनस्तस्य रंगकारस्याऽनुजीविनोऽनुचराः द्रुततरमतिशीघ्रं आत्तगंधतया भग्नदर्पत्वेन पलायनमूरीचक्रुरंगीकुर्वंति स्म॥तद्भयात्पलायनं कुर्वंति स्मेत्यर्थः ॥ आत्तगंधोऽभिभूतः स्यादित्यमरः॥उत्प्रेक्षते॥क्षितिधरेत्यादि॥क्षितिधरः पृथ्वीधारको यः श्वसनाशनः पवनाशनः शेषस्तदवतारो बलरामस्तस्य यद्दर्शनं तेन संजातं साध्वसं भयं येषां ते तथाविधास्तेषां भावस्तत्ता तया हेतुना पलायमानान् ॥ स्वेति ॥ स्वस्वामिनो रंजकस्य ये प्राणश्वसनाः प्राणवायवस्तान् शीघ्रं परिग्रहीतुमिव॥ तथा ॥ तदिति ॥ तस्य बलरामस्याऽवलोकनाद्यद्भयं तेन बंधुरैर्युक्तैरित्यर्थः ॥ स्वस्वामिप्राणसमीरैरपि समीरिताइव प्रेरिताइव ॥ अत्र क्षितिधरेति विशेषणात्सर्वदा समग्रधरणिधारणप्रयुक्ताऽऽयासवशेनाऽत्युद्दीपितक्षुद्वाडवतया सर्वानेवाऽस्मत्प्राणवायूनपि भक्षयेदिति पलायनहेतुभूतं भयं सूचितं ॥ ६ ॥

प० ॥ नानावर्णान्यंबराण्यत्रधृत्वा मुक्तिं दत्वा शी
घ्रमस्मै मुकुंदः॥ कांतं कर्तुं तादृशायाऽऽगताय





तत्राऽऽत्मानं वायकायाऽप्यभात्सः ॥ ८ ॥

नानेति ॥ सः प्रसिद्धः मुकुंदो मुकुं मुक्तिं ददातीति मुकुंद इत्यन्वर्थनामा श्रीकृष्णः अत्र रजकहननस्थाने नानावर्णान्यंबराणि वस्त्राणि धृत्वा अस्मै रंगकराय शीघ्रं मुक्तिं दत्वा आत्मानं कांतं अनुरूपवस्त्राऽलंकाराद्यर्पणेन रमणीयं कर्तुं तत्राऽऽगताय तादृशाय कांताय ॥ अत्र कंकारोंऽते यस्य स कांत इत्यर्थो बोद्ध्यः ॥ वायकायापि तंतुवायायाऽपि शीघ्रं मुक्तिं सारूप्यलक्षणां दत्वा अभात् शोभते स्म ॥ तदुक्तं श्रीमद्भागवते ॥ तस्य प्रसन्नो भगवान् प्रादात् सारूप्यमात्मन इति ॥ शालिनी वृत्तं ॥ ८ ॥

ततः परं मालाकारस्य॥ नेत्रयुगे च पदे मेशौरि
र्मत्वेति पुष्पवत्वं वै ॥ साधयितुं सतथात्वं कंठो
रसि संविवेश तस्य गृहं॥ ९ ॥

ततइत्यादि ॥ उत्तरान्वयि ॥ नेत्रेति ॥ ततः परं वायकोद्धरणाऽनंतरं सः शौरिः श्रीकृष्णः तस्य परमभक्तत्वेन प्रसिद्धस्य मालाकारस्य गृहं संविवेश सम्यक् प्रविष्टः ॥ सम्यक्त्वं च तदुद्धरणेच्छापूर्वकत्वात् बोद्ध्यं ॥ अत्रोत्प्रेक्षते ॥ नेत्रेत्यादि ॥ वै निश्चये ॥ मे मम नेत्रयुगे च परं पदे चरणे पुष्पवत्त्वं एकयोक्त्या पुष्पवंतौ दिवाकरनिशाकरावित्यमरात् सूर्यचंद्ररूपत्वं अथच सामुद्रिकरेखारूपकमलाख्यपुष्पयुक्तत्वं अस्ति इति मत्वा निश्चित्य कंठोरसि कंठे वक्षस्थले च तथात्वं पुष्पवत्वं मालाधारणेन पुष्पविशिष्टत्वं साधयितुमिवेति गम्योत्प्रेक्षा ॥ ९ ॥

**ग० ॥ तदवसरेऽतिसुखदतदाऽऽगमनवर्षर्तुसंजाततद्दर्शनसुधाऽऽसारसारेणाऽऽशयकासारसमुद्रिक्तभक्तिरसनिर्झरैरिव नयनसलिलैः पथविषक्तरजःकणांश्चरणाभ्यां परिमार्ष्टुमिव तदुपरि कृतप्रणामाय स्वनामाऽन्वर्थनसमर्थनपरतया सुमनःसुदामविरचिताऽर्चनाय तस्मै स्वभक्ताय सुदाम्ने यदुपरिवृढः स्वस्मिन् भावस्थितिमदात् ॥ ७॥**

तदवसरइति ॥ यदुपरिवृढः यदूनां यादवानां परिवृढः प्रभुः श्रीकृष्णः ॥ प्रभुः परिवृढोऽधिप इत्यमरः ॥ स्वभक्ताय तस्मै सुदाम्ने एतन्नाम्ने मालाकाराय स्वस्मिन् विषये भावस्थितिं भावस्य प्रेमलक्षणाया भक्तेरवस्थितिं अदात् ददाति स्म॥कीदृशाय सुदाम्ने॥ तदुपरि भगवच्चरणोपरि कृतप्रणामाय॥अत्रोत्प्रेक्षते॥तदवसरइत्यादि ॥ तदवसरे स्वगृहे श्रीकृष्णप्रवेशसमये ॥ अतीति ॥अतिसुखदं यत्तदाऽऽगमनं श्रीकृष्णाऽऽगमनं तदेव वर्षर्तुस्तेन कृत्वा संजातस्तद्दर्शनरूपायाः सुधाया आसारो वृष्टिस्तस्याः सारेण बलेन ॥ अथवा सारेण सरणेन प्राप्त्येति यावत् ॥ सारो बले स्थिरांऽशे चेत्यमरः ॥ आशयेति ॥आशयोंऽतःकरणं स एव कासारः सरस्तस्मात्समुद्रिक्ता अंतःपूरणेनाऽवकाशाभावाद्बहिरुच्छालिता ये भक्तिरसस्य निर्झराः प्रवाहास्तैरिवेत्युत्प्रेक्षा ॥ नयनसलिलैरानंदाश्रुभिः करणैः ॥ पथेति ॥ पथे मार्गे विषक्ता गमनवशात् संलग्ना ये रजसां धूलीनां कणास्तान् चरणाभ्यां सकाशात् परिमार्ष्टुमिव क्षालयितुमिव ॥ पुनः कीदृशाय ॥ स्वनामेति ॥ स्वस्य यन्नाम



सुदामेति तस्य यदन्वर्थनं सुष्ठु दामानि माला यस्येत्यनुगतार्थत्वकरणं तस्य यत्समर्थनं अनुभवगोचरीकरणं तद्विषये परस्तत्परस्तस्य भावस्तत्ता तया हेतुना ॥ सुमनइति ॥ सुमनसां पुष्पाणां यानि सुदामानि उत्तममालास्तैर्विरचितं पूजनं येन तस्मै ॥ ७॥

**यतः॥ प० ॥ द्विजसंघैः संयुक्तं सिक्तं दानांऽबुनाऽनिशं भवनं॥ यद्यपि तदत्र सुखिभिर्दृष्टं भावस्थितिं विना हेयं ॥ १० ॥**

भावस्थितेरेव श्रैष्ठ्यं श्लेषभंग्या दर्शयति ॥ यतइति ॥ श्लोकेन्वेति ॥ द्विजसंघैरिति ॥ अत्र लोके यद्यपि गृहं भवनं अनिशं निरंतरं दानांऽबुना दानं वितरणं तत्संबंधि यदंबूदकं तेन सिक्तं अत एव द्विजसंघैर्ब्राह्मणसमूहैः संयुक्तं अस्ति तदपि इति शेषः भावस्थितिं विना भावस्य भगवद्भक्तेः स्थितिं विना दृष्टं चेत् भगवद्भावरहितं दृष्टं चेदित्यर्थः ॥ सुखिभिरात्मसुखवद्भिः साधुभिर्यतः हेयं त्याज्यमेव ॥ अथच श्लेषेण भावऽस्थितिं विना भस्य भकारस्य अवस्थितिं विना भकारस्थितिरहितं दृष्टं भवनं वनमित्यर्थः॥यद्यपि द्विजसंघैः पक्षिसमूहैःसंयुक्तं तथा दानांऽबुना वन्यगजदानोदकेन अनिशं नित्यं सिक्तं तथापि सुखिभिः सुखाऽभिलाषिभिर्गृहस्थैर्यतो हेयमेव अतस्तस्मै भावस्थितिमदादिति पूर्वेणाऽन्वयः ॥ १० ॥

**सुदामसदने युक्तं सुदामाऽभूद्धरिस्त्वगात् ॥ मालाकारस्य संपर्कादमालाकारतां कथं ॥ ११ ॥**

सुदामेति॥हरिः सुदामसदने सुदामाख्यमालाकारगृहे सुदामा सुष्ठुदामानि माला यस्य स सुदामा अभूत् युक्तमेतत् तु परंतु मालाऽऽकारस्य मालाविशिष्ट आकारो यस्य स तस्य संपर्कात् संसर्गात् अमालाऽऽकारतां मालाविशिष्टाऽऽकारराहित्यं कथमगात् ॥ आश्चर्यमेतदिति भावः ॥ वस्तुतस्तु मालाकारस्य मालिकस्य संसर्गात् अकारो वासुदेवः स्यादित्येकाक्षरात् अश्चाऽसौ मालकारो मालाविशिष्टाकारश्च तस्य भावस्तत्ता तामगात् ॥ अत्र यद्यपि उपसर्जनसंज्ञाया अन्वर्थत्वेन मालाकारशब्दस्यैव पूर्वनिपातः प्राप्तस्तथाऽपि विशेषणं विशेष्येण बहुलमिति बहुलग्रहणादंशब्दस्य पूर्वप्रयोगः ॥ ११ ॥

**किंच॥स्त्रीजननेत्रोद्दीपेष्विह मालिन्यस्य पुष्पवत्त्वं वै॥हेतुस्तथाऽपि चित्रं तत्त्वे ऽस्याऽऽसीत्तथाविधस्य न तत्॥१२॥**

किंचेति ॥ स्त्रीजनेति ॥ इह लोके स्त्रीजनाश्च नेत्राणि च उद्दीपा उत्कृष्टदीपाश्च तेषु मालिन्यस्य मलिनत्वस्य हेतुः कारणं पुष्पवत्त्वं अस्ति वै निश्चये ॥ स्त्रीणां पुष्पवत्त्वमार्तवं नेत्राणां पुष्पाख्योनेत्ररोगः दीपेषु कज्जलगोलको मालिन्यहेतुः ॥ दीपाग्रवर्तिकज्जलगोलके पुष्पमिति व्यवहारो लोकप्रसिद्धः ॥ तथाऽपि तथाविधस्य स्त्रीजननेत्रोद्दीपस्य अस्य श्रीकृष्णस्य ॥ अत्र स्त्रीजनानां यानि नेत्राणि तान्युद्दीपयत्युल्लासयतीति स्त्रीजननेत्रोद्दीपईत्यर्थोबोध्यः ॥ तत्त्वे सत्यपि मालाधारणेन पुष्पवत्त्वे सत्यपि तत् मालिन्यं नासीत् प्रत्युत मालाधारणेन विशिष्टशोभा-



वत्त्वमेव ॥ चित्रमेतत् ॥ एतत् चित्रं श्लेषमूलकं बोध्यं ॥१२॥

**हरिः पुष्पवान् पुष्पमालाधरत्वात्तदास्तां तथाऽस्ति प्रसिद्धं हि लोके॥ रसाँस्त्रीन् सुनेत्रे विलोक्याऽपि तस्मिन् सुखं पुष्पवत्त्वं वदंतीतिचित्रम्॥१३॥**

हरिरिति॥हरिः श्रीकृष्णः पुष्पमालाधरत्वाद्धेतोः पुष्पवान्पुष्पविशिष्टः अभूत् तदास्तां ॥ हि यस्मात्तथा पुष्पमालाधरस्य पुष्पवत्वं लोके प्रसिद्धं अस्ति तस्मादिदं युक्तमिति भावः ॥ सुनेत्रे भगवतः सुंदरे लोचने त्रीन् रसान् कृष्णश्वेतरक्तवर्णरूपेण शृंगारहास्यवीराख्यान् ॥ शृंगारहास्यवीराणां कृष्णश्वेतरक्तवर्णत्वं साहित्यदर्पणे प्रतिपादितं ॥ सुखं यथा स्यात्तथा विलोक्याऽपि लोकाइति शेषः तस्मिन् सुनेत्रे पुष्पवत्त्वं नेत्ररोगवत्त्वं वदंतीति चित्रं॥ वस्तुतस्तु एकयोक्त्या पुष्पवंतौ दिवाकरनिशाकरावित्यमरात् पुष्पवत्वं सूर्यचंद्ररूपत्वं॥भुजंगप्रयातं वृत्तं ॥ भुजंगप्रयातं भवेद्यैश्चतुर्भिरिति तल्लक्षणात् ॥ १३ ॥

**ग०॥ तदनु तत्सदनतः कृताऽवस्पंदनो राजवर्त्मनि विचरंतीं तद्दुरितभरन्युब्जीभूताऽगलतिकां राजलक्ष्मीमिव कुब्जामालोक्य सखायमेवमवोचत्॥८॥**

अथकुब्जाऽनुग्रहलीलामुपक्रमते॥तदन्विति ॥ तदनु मालाकाराऽनुग्रहाऽनंतरं तत्सदनतः मालाकारगृहात् कृताऽवस्पंदनः कृतनिर्गमनः नंदनंदनः श्रीकृष्णः राजवर्त्मनि विचरंतीं कुब्जामालोक्य

सखायं प्रति एवं वक्ष्यमाणप्रकारेण अवोचत् ॥ कुब्जत्वे हेतूद्भावनपूर्वकमुत्प्रेक्षते ॥ तदित्यादि ॥ तस्य कंसस्य दुरितभरेण पापभरेण न्युब्जीभूता कुब्जीभूता अंगलतिका यस्यास्तथाविधां ॥ न्युब्जं कुब्जे कुशे स्रुचीतिहैमः ॥ राजलक्ष्मीमिव ॥ ८ ॥

**प० ॥ लावण्यमिष्टरसतो न्युब्जीभूतेव भाति कुब्जेयम् ॥ शार्कररससंमग्ना मृद्वीका रसिकसुखदेव ॥ १४ ॥**

यदवोचत्तदाह ॥ लावण्येति ॥ अयि सखे इयं कुब्जा लावण्यमेव मिष्टो मधुरो यो रसस्तस्मादिति लावण्यमिष्टरसतइवेत्युत्प्रेक्षा ॥ न्युब्जीभूता कुब्जीभूता अतएव रसिकसुखदा भाति ॥ कुब्जत्वं ह्यंगसंकोचमंतरा न भवतीति लावण्याख्यमधुररससंबंधादंगसंकोचेनेव कुब्जा भातीति भावः ॥ मधुररससंबंधेन वस्तुसंकोचमुपमया बोधयति ॥ शार्करेति ॥ शर्करायाः अयं शार्करः ॥ तस्येदमित्यण् ॥ यो रसस्तस्मिन् संमग्ना मृद्वीकेव द्राक्षेव ॥ परिपक्वशर्कराररसमध्ये निक्षिप्ता द्राक्षा यथा ऽवयवसंकोचद्वारा वक्रतामापद्यते रसज्ञानां सुखदा च भवति तद्वदिति भावः ॥ पथ्याऽऽर्या वृत्तं ॥ ॥ १४ ॥

**तदनंतरमसौ ॥ अलकभ्रूसंवीक्षणवक्रत्वस्पर्धया तथाभूतैः ॥ त्रिस्थानैरुपलक्ष्यां संप्राप्याऽऽह प्रियंवदः कृष्णः ॥ १५ ॥**

तदनंतरमित्यादि ॥ उत्तराऽन्वयि ॥ अलकेति ॥ तदनंतरं भाषणानंतरं प्रियंवदः असौ कृष्णः तामिति शेषः तां कुब्जां संप्राप्य आ-



गत्याह ॥ कीदृशीं तां ॥ अलकेत्यादि ॥ अलकाः केशाश्च भ्रुवौ च संवीक्षणं च तेषां यद्वक्रत्वं कुटिलत्वं तस्य या स्पर्धा तयेवेति गम्योत्प्रेक्षा ॥ तथाभूतैर्वक्रीभूतैः त्रिस्थानैः उपलक्ष्यां ज्ञेयां त्रिवक्रामित्यर्थः ॥ १५ ॥

**हृदयेक्षणकरतलमयि मत्वा रागाऽन्वितं मया प्राप्तं ॥ देय रसएव सुंदरि तापहराऽऽमोददस्त्वया श्लाघ्यः ॥ १६ ॥**

तदाह ॥ हृदयेक्षणेति ॥ यत इति शेषः ॥ अयि कुब्जे हृदयं च ईक्षणे च करतलं च हृदयेक्षणकरतलं ॥ प्राण्यंगत्वादेकत्वं ॥ अर्थात्तव रागाऽन्वितं यथासंख्यं प्रेम्णा रक्तत्वेन पात्रसंभूतांऽगरागेणच अन्वितं युक्तं मत्वा मया प्राप्तं आगतं ॥ नपुंसके भावे क्तः ॥ ततोहेतोः हेसुंदरि तापहरश्चाऽसावामोददः सौगंध्यप्रदो हर्षप्रदश्च वा तापहराऽऽमोददः अतएव श्लाघ्यः स्तुत्यः सएव रागएव देयः मह्ममिति शेषः ॥ अत्र रागशब्देन रंजनवाचिनांऽगरागो लक्ष्यते ॥ १६ ॥

**तदानीं ॥ श्रुत्वा वचनमाधुर्यमरागाऽपि सरागतां ॥ आश्रित्य चक्रे माधुर्यं तादृक्षं सा बलाऽन्वितं ॥ १७ ॥**

तदानीमिति ॥ अंगरागयाचनाऽवसरे ॥ श्रुत्वेति ॥ सा कुब्जा वचनमाधुर्यं श्रीकृष्णवचनसंबंधि माधुर्यं श्रुत्वा ॥ माधुर्यश्रवणं चोपनीतभानवत् वचनद्वारकं भेर्यः श्रूयंते इति वदौपचारिकं वा बोध्यम् ॥ अरागा प्रेमरहिताऽपि सरागतामाश्रित्येति

विरोधाऽऽभासः ॥ परिहारस्तु रागो मात्सर्यं तद्राहिता नतु रंगकारवन्मात्सर्यवती ॥ यद्वा ए भगवति वासुदेवे कृष्णे रागः प्रेम यस्याः सा ॥ सरागतां वैषयिकाऽनुरागवत्त्वं कामाऽऽविर्भाववशाद्रक्तवर्णविशिष्टत्वं वेति ॥ बलाऽन्वितं बलरामसहितं माधुर्यं माया लक्ष्म्याः धुर्यं पतिं श्रीकृष्णं तादृक्षं सरागं अंगरागसहितमिति यावत् तदर्पणेन स्वविषयप्रेमवंतं च चक्रे कृतवती ॥ १७ ॥

**ग० ॥ तत्समय समस्तस्यास्त्रिवक्राया स्सर्वेष्वप्यंगेषु निजतनयस्य कुसुमशरस्य व्याप्तिं विलोक्य तस्मिन्नपि वक्रत्वं संपद्येतेतिशंकया शबलाऽऽशय इव शीघ्रं स्वकरकमलांऽगुलिधृतचिबुकां तां कांतां समामकरोत् ॥ साऽपि तच्चाटुतरवचनप्रबोधजागरूकेण हृच्छयेन तत्करेंदीवरसंस्पर्शसंल्लालनद्विगुणितेन तत्तनयेनाऽनुमोदितेव समोदं स्वसद्म तं नेतुं शयांऽचलेन तत्पीतवसनांऽचलं चंचला समाचकर्ष चैवमवोचत् ॥ ९ ॥**

तत्समयइति ॥ तत्समये अंगरागाऽर्पणसमये समः मया लक्ष्म्यासहितः समः श्रीकृष्णः अथच समः समानः सरलइति यावत् अतएव तां कांतां कुब्जां शीघ्रं समां समानां सरलांगीमिति यावत् अकरोत् ॥ शैघ्र्येणैवंकरणे हेतुमुत्प्रेक्षते ॥ तस्याइत्यादि ॥ तस्यास्त्रिवक्रायाः सर्वेष्वप्यंगेषु निजतनयस्य स्वपुत्रस्य कुसुमशर-





स्य कामस्य व्याप्तिं विलोक्य तस्मिन्कामे ऽपि वक्रत्वं वक्रकुब्जांऽगसंपर्कात्कुटिलत्वं संपद्येत प्राप्नुयादिति शंकया शबलाऽऽशय इव व्याप्तांतःकरणइव ॥ कीदृशीं कांतां ॥ स्वकरेति ॥ स्वकरकमलांऽगुलिभिर्धृतं चिबुकं अधराऽधरभागो यस्यास्तां ॥ अत्र स्वशब्देन कृष्णः ॥ साऽपीति ॥ साऽपि कुब्जाऽपि चंचला कामाऽऽविर्भाववशादतितरलासती तं श्रीकृष्णं स्वसद्म स्वगृहं नेतुं तत्पीतवसनांऽचलं तस्य श्रीकृष्णस्य यत्पीतवसनं पीतांऽबरं तस्यांऽचलं पल्लवं शयांऽचलेन कराऽग्रेण समोदं सहर्षं यथा स्यात्तथा समाचकर्ष च परं एवं वक्ष्यमाणप्रकारेणाऽवोचत् ॥ कीदृशीव सा ॥ तच्चाटुतरेत्यादि ॥ तस्य श्रीकृष्णस्य चाटुतराणि रम्यतराणि यानि वचनानि तैः कृत्वा यः प्रबोधः प्रकर्षेण बोधनं तेन जागरूकेण ॥ तत्करेति ॥ तस्य श्रीकृष्णस्य यत्करेंदीवरं करकमलं तस्य यः सम्यक् स्पर्शस्तेन कृत्वा यत्सम्यक् लालनं तेन द्विगुणितो द्वैगुण्यरूपाऽतिशयं प्राप्तस्तेन तत्तनयेन श्रीकृष्णतनयेन हृच्छयेन कामेनाऽनुमोदितेव वस्त्रांऽचलं धृत्वा गृहं नयेति दत्ताऽनुमोदनेवेत्युत्प्रेक्षा ॥ अत्र तत्तनयेनेति विशेषणं लालनौचित्यबोधनाय ॥ स्वपित्रादिरन्यत्रक्वचिद्गंतुं प्रवृत्तश्चेद्बालेन वस्त्रादौ धृत्वा आकृष्यते इति प्रसिद्ध्यनुरोधेन मदनस्य स्वतोऽनंगत्वात्स्वकरेणाऽऽकर्षणाऽसंभवात् कुब्जाहृच्छयः सन् तां प्रेरितवानिति तया तथाऽऽकृष्टइति भावः ॥ ९ ॥

**प० ॥ माराऽऽतपसंतप्तामधराऽमृतसेचनेन कुरु शीघ्रम् ॥ एहि गृहं प्रेमरसैः प्रिय ननु मां शीतलां जलदनील ॥ १८ ॥**

यदुक्तवती तदाह ॥ मारेति ॥ नन्वित्यनुनये ॥ हे जलदनील मेघश्याम ॥ एतेन प्रार्थ्यमानतापहरणयोग्यत्वं ध्वनितं ॥ हेप्रिय श्रीकृष्ण ॥ एतेन स्वगृहाऽऽगमनप्रार्थनौचित्यं ध्वनितं ॥ त्वमिति शेषः गृहं मदीयं एहि अथच मारस्य कामस्य संबंधी य आतपस्तेन सम्यक् तप्तां मां प्रेमरसैः स्नेहरसैः कृत्वा अधराऽमृतसेचनेन शीघ्रं शीतलां कुरु ॥ अथवा प्रेमरसैः प्रेमाख्यैर्जलैः अधराऽमृतसेचनेनच शीघ्रं शीतलां कुरु ॥ १८ ॥

**ग० ॥ तदा किल मुदा स्ववचननिपुणिमनेत्रसंवेष्टितनिजदर्शनमंदरेण मारेण निर्मथ्यमानात्तदाशयपयःपयोधेः स्कंदमानां तद्वदनकलधौतविमलकलशगलितां ललितां तद्वाक्सुधां श्रोत्रपुटकाभ्यांनिपीय सुमनोंऽचितः प्रभुः प्रहसन् प्रत्युत्तरमेवंप्रादात् ॥ १० ॥**

तदेति ॥ तदाकिल तत्प्रार्थनासमये सुमनोंऽचितः सुमनोभिर्देवैरंचितः पूजितः कुब्जया शोभनेन मनसा अंचित इति वा मालाकारेण पुष्पैरंचित इति वा ॥ एवंविधः प्रभुः श्रीकृष्णः प्रहसन् मुदा हर्षेण एवं वक्ष्यमाणप्रकारेण प्रत्युत्तरं प्रादात् ॥ किंकृत्वा॥ स्ववचनेत्यादि ॥ स्ववचनसंबंधी यो निपुणिमा नैपुण्यं॥अत्र स्वशब्देन कृष्णो गृह्यते॥ स एव नेत्रं मंथगुणस्तेन संवेष्टितो निजदर्शनमेव मंदरस्तेन कृत्वा मारेण मदनेन कर्त्रा नितरां मथ्यमानात्॥ तदाशयेति ॥ तस्याः कुब्जाया य आशयोंऽतःकरणं स एव पयःपयोधिः क्षीरसमुद्रस्तस्मात्स्कंदमानां उद्गच्छंतीं ॥ स्कंदतेर्गत्यर्थस्य भौवादिकस्याऽऽत्मनेपदिनो रूपं ॥ तद्वदनेति ॥ तस्याः कुब्जाया वदनमेव कलधौतस्य सुवर्णस्य विमलः कलशस्तद्गलितां ललितां रमणीयां तद्वाक्सुधां तस्याः कुब्जायाः वागेव सुधा तां श्रोत्रपुटकाभ्यां निपीय सादरं श्रुत्वेत्यर्थः ॥ १० ॥



**प० ॥ खलं खलीननिर्मुक्तं स्वस्थं कृत्वा खलु प्रिये ॥ एष्यामि सदनं तूर्णं पूर्णं मदनमोददम् ॥ १९ ॥**

तदाह ॥ खलमिति ॥ हेप्रिये अहं खलीननिर्मुक्तं खलीनाल्लक्षणया निर्बंधान्निर्मुक्तं विश्रृंखलमिति यावत् एवंविधं खलं कंसं स्वस्थं स्वर्गस्थं कृत्वा मारयित्वेत्यर्थः ॥ तवेति शेषः ॥ तव पूर्णं सकलवस्तुपरिपूर्णं मदनमोददं कामाऽऽनंददायकं सदनं गृहं प्रति तूर्णं एष्यामि खलु निश्चये ॥ १९ ॥

**ग० ॥ ततः परमरुचिरतरफलजनकं वचनं तत् श्रुत्वाऽभ्युच्छ्रितात् कृच्छ्रात्तदीयदेहो वक्रतयेव तया समुत्सृष्टः स्ववदनाऽद्भुतचंद्राऽवलोकनचकोरायमाणचेतोभिः स्वीयलावण्यपीयूषप्रवाहं नयनचषकैः संपिबद्भिर्मधुपुरपौरैरभिनंद्यमानः सबलःशौरिनंदनः ॥ ११ ॥**

अथ भगवतो धनुःप्रदेशगमनमुत्प्रेक्षापूर्वकं वर्णयति ॥ ततइत्यादिगद्येन औपस्येति श्लोकसहितेन ॥ तत्र गद्येन शौरिनंदनं विशिनष्टि ॥ परमेत्यादि ॥ ततः आगमनसंकेतकरणाऽनंतरं तया कुब्जया परममुत्कृष्टं रुचिरतरस्य सुंदरतरस्य फलस्य वासनापू-

तिलक्षणस्य जनकं तद्वचनं श्रीकृष्णवाक्यं श्रुत्वा अत्युच्छ्रितात् महतः कृच्छ्रात् संकटात् .संकटंप्राप्येत्यर्थः ॥ समुत्सृष्टः ॥ कया कइव ॥ वक्रतया कुटिलतया कृब्ज्या तदीयदेहइव कुब्जाशरीरमिव ॥ तथा ॥ मधुपुरपौरैर्मथुरासंबंधिभिर्जनैः अभिनंद्यमानः स्तूयमानः ॥ कीदृशैर्मधुपुरपौरैः ॥ स्वेति ॥ स्वशब्देनकृष्णः स्ववदनमेवाऽद्भुतचंद्रस्तस्याऽवलोकनविषये चकोरायमाणानि चकोरवदाचरंति चेतांसि येषां तैः ॥ पुनः कीदृशैः ॥ स्वीयेत्यादि ॥ अत्राऽपि स्वशब्देन कृष्णः स्वीयं स्वसंबंधि यल्लावण्यं तदेवपीयूषममृतं तस्य प्रवाहं नयनचषकैर्लोचनरूपैः पानपात्रैः सम्यक्पिबद्भिः ॥ पुनःकीदृशः ॥ सबलः बलरामसहितः शारीरादिबलसहितो वा ॥ ११ ॥

**प०॥ औग्रस्य चंडधनुषः कदनेन पूर्वं प्राप्ता प्रिया ससहजेन तथाऽधुनाऽपि ॥ प्राप्स्यामि किं न जनकाऽधिकृते पुरेऽस्मिन्मत्वेव तत्प्रतिययौ गुरुणोपनीतः॥ २० ॥**

औग्रस्येति ॥ गद्यस्थं शौरिनंदनइति पदमत्र कर्तृत्वेनाऽन्वेति ॥ शौरिनंदनः पूर्वोक्तविशेषणविशिष्टो वसुदेवतनयः श्रीकृष्णः इति मत्वेव तच्छंकरदत्तं धनुः प्रतिययौ ॥ इति किं ॥ पूर्वं रामाऽवतारे जनकाऽधिकृते जनकेन विदेहेनाऽधिकृते अधिष्ठिते पुरे मिथिलायां औग्रस्य उग्रस्य शंकरस्येदमौग्रं तस्य ॥ उग्रः कपर्दी श्रीकंठ इत्यमरः ॥ चंडस्य धनुषः कदनेन भंगेन कृत्वा ससहजेन सहजेन भ्रात्रा लक्ष्मणेन सहितेन॥समानोदर्यसोदर्यसगर्भ्यसहजाः



समा इत्यमरः ॥ गुरुणा विश्वामित्रेणोपनीतेनेति विभक्तिविपरिणामेनाऽत्रापि योजनीयं ॥ मयेतिशेषः प्रिया प्राप्ता॥ अधुनाऽपि तथा कंसनिहितोग्रधनुर्भंगेन प्रकारेण जनकाऽधिकृते जनकेन स्वपित्रा वसुदेवेनाऽधिकृते अस्मिन् पुरे मथुरायां गुरुणाऽक्रूरेणोपनीतः सहजेन भ्रात्रा बलरामेण सहितः अहमिति शेषः प्रियां न प्राप्स्यामि किमपितु प्राप्स्याम्येवेति ॥ वसंततिलका वृत्तं ॥ ॥ २० ॥

**ग० ॥ तत्र खलु कौतुकाऽवलोकनपर्युत्सुकैर्नागरिकैः परिवार्यमाणः शार्ङ्गपाणिः प्रचंडं मृडस्य कोदंडदंडं समवलोक्य॥ १२ ॥**

तत्रेति ॥ तत्र धनुः स्थाने ॥ खलु वाक्याऽलंकारे ॥ मृडस्य शंकरस्य ॥ शार्ङ्गपाणिरित्यनेनैतावत्पर्यंतं धनुर्विद्याऽभ्यासाऽभावेऽपि धनुःसज्जीकरणादावतिनैपुण्यं ध्वनितं ॥ शेषंस्फुटं ॥ १२ ॥

**प० ॥ भ्रूदंडस्य विडंबनं प्रकुरुते कोदंडमेतत्सदा पाखंडप्रचुरप्रध्वारणपरस्येदं प्रदंड्यं तदा ॥ दोर्दंडप्रभवप्रतापसमरे योग्यं विचिंत्येव यत् कंसस्य प्रबभंज साऽग्रजहरिः खंड्यं बलैरावृतम् ॥ २१ ॥**

भ्रूदंडस्येति ॥ साऽग्रजहरिः अग्रजेन बलरामेण सहितः सचाऽसौ हरिश्च साग्रजहरिः तदा इति विचिंत्येवेत्युत्प्रेक्षा ॥ कंसस्य कोदंडं धनुः प्रबभंजेत्यन्वयः ॥ इति किं॥ एतत् धनुः यत् यस्मात् सदा सर्वदा भ्रूदंडस्य अर्थान्ममेति योज्यं ॥ विडंबनमनुकरणं

प्रकुरुते ॥ तथा ॥ दोर्दंडेति ॥ दोर्दंडप्रभवो यः प्रतापस्तद्विशिष्टे समरे संग्रामे योग्यं अस्ति ॥ अत इदं प्रदंड्यं प्रकर्षेण दंडार्हमिति ॥ कीदृशस्य कंसस्य ॥ पाखंडेति ॥ पाखंडस्य वेदविरुद्धाऽऽचरणस्य प्रचुरं यत्प्रचारणं तत्परस्य ॥ देवद्विजबालकादिविघातादिरूपवेदविरुद्धकर्माऽवलंबादेतस्य तत्त्वं ॥ इदमपि धनुर्भंगे हेतुगर्भं विशेषणं बोध्यं ॥ कीदृशं कोदंडं ॥ बलैः सैन्यैरावृत्तं ॥ अतएव खंड्यं खंडनार्हं ॥ कोदंडखंडनेन रोषाऽऽवेशादापतितस्य तद्रक्षकसैन्यस्याऽपि हननमनायासेनैव भविष्यतीत्यतः खंडनयोग्यमित्यर्थः ॥ यद्वा बलैरावृतमित्यनेन स्वनिष्ठसबलत्वविडंबनमपि खंडनहेतुरितिबोध्यं ॥ शार्दूलविक्रीडितं वृत्तं ॥ २१ ॥

**भोभो स्मरारे जनकेन तस्य संप्रापितोऽहं तु दशामिमांद्राक्॥ चुक्रोश किं रावमिषेण चापः प्रभज्यमानोऽद्भुतचंडशब्दः॥ २२॥**

धनुः खंडनजन्यध्वनिमुत्प्रेक्षापूर्वकं वर्णयति ॥ भोभोइति ॥ प्रभज्यमानो ऽतएव अद्भुतश्चंडो भयंकरः शब्दो भंजनजन्यो ध्वनिर्यस्यैवंभूतश्चापो धनुः एवं बभासे शुशुभे ॥ एवं कथमित्याकांक्षायामपन्हुतिगर्भोत्प्रेक्षापूर्वकमाह ॥ भोभोइत्यादि ॥ रावमिषेण शब्दच्छलेन ॥ भोभो स्मरारे मदनारे शंकर अहं तु तस्य स्मरस्य जनकेन कृष्णेन इमां दशां द्राक् झटिति संप्रापितः अस्मि इति चुक्रोश किमिति संभवनायां ॥ उपजातिर्वृत्तं ॥ २२ ॥

**ग० ॥ ततः परमतिभीषणतन्निध्वानश्रवणप्रक्षुब्धैः कंकटादिपरिकरसन्नद्धैः करदृढधृतत्सरुखड्गप्र**



**स्मरकिरणधोरणीभिः प्रतिककुभं विद्युच्छटाभ्रांतिमुत्पादयद्भिर्निजपदोद्भूतधूलिनिकुरंबैर्दुर्दिनसंभावनोद्भावने निपुणैः स्वीयक्ष्वेडाव्याजेन स्तनितशंकाप्रवर्धकैरतिरभसचलनसमुद्भूतघर्मौघेन वर्षर्तुकरणे प्रगल्भैः पौरजनताऽतिकलकलमुखरितेषु काष्ठांतरेषु सत्सु तैर्घनै राजभटैरनुधाव्यमानः कृष्णः सभयतयेव तत्प्रपदप्रपीडनेन प्रचलत्क्षोणीतलमावेक्ष्य घृणाऽवघूर्णित इव तूर्णं तान् सबलः स धनुःशकलाभ्यां कीनाशपुटभेदनकुटुंबितामनैषीत्॥ १३॥**

ततइति ॥ ततःपरं धनुर्भंगानंतरं सबलः सः श्रीकृष्णः तान् चापरक्षिणो राजभटान् धनुःशकलाभ्यां चापखंडाभ्यां तूर्णं शीघ्रं ॥ कीनाशेति॥ कृतांते पुंसि कीनाश इत्यमरात् कीनाशो यमस्तस्य यत्पुटभेदनं संयमिनीनामकं पत्तनं तत्संबंधिकुटुंबितां तन्निवासित्वमिति यावत् अनैषीत् प्रापितवात्॥ तान् सर्वान्मारितवानित्यर्थः ॥ उत्प्रेक्षते॥ सभयतयेव राजभटसंचरणजन्यभयवत्त्वेनेव ॥ तदिति॥ तेषां राजभटानां यानि प्रपदानि पादाग्राणि तैः कृत्वा यत्प्रपीडनं तेन प्रचलत् प्रकर्षेणचंचलं एवंविधं क्षोणीतलं पृथ्वीतलं आवेक्ष्य सर्वतोऽवलोक्य घृणाऽवघूर्णितइव जुगुप्साकरुणे घृणे इत्यमरात् घृणा करुणा तयाऽवघूर्णितः व्याप्तइव ॥ कीदृशः कृष्णः ॥ काष्ठांतरेषु काष्ठोत्कर्षे स्थितौ दिशीत्यमरात् दिगंतरेषु ॥ पौरेति ॥ पु

रे भवा पौरी सा चाऽसौ जनता जनसमूहस्तस्या अतिकलकलेन मुखरितेषु शब्दायमानेषु सत्सु तैश्चापरक्षणनियुक्तैर्घनैर्दृढैः पक्षे मेघरूपैः राजभटैरनुधाव्यमानः कृतानुधावनः ॥ कीदृशैराजभटैः ॥ अतिभीषणेति ॥ अतिभीषणोऽतिभयंकरो यस्तस्य धनुषो निध्वानस्तस्य श्रवणेन प्रक्षुब्धैः ॥ तथा ॥ कंकटादीति ॥ सन्नाहो वर्म कंकट इति हैमात् कंकटः कवचं आदिर्यस्मिन्नेवंविधो यः परिकरो युद्धोपकरणसामग्री तेन सन्नद्धैः सज्जैः ॥ तथा ॥ करेति ॥ करैर्दृढं यथा स्यात्तथा धृताः त्सरवो मुष्टयो येषां ते च ते खड्गाश्च तेभ्यः प्रस्मराः प्रसरंत्यो याः किरणधोरण्यः किरणपरंपरास्ताभिः कृत्वा प्रतिककुभं प्रतिदिशं ॥ झयइति झयंतादव्ययीभावाद्वच् ॥ विद्युच्छटाभ्रांति उत्पादयद्भिः ॥ तथा ॥ निजेति ॥ निजानि स्वकीयानि यानि पदानि तैरुद्धूता ये धूलिनिकुरंबा रजःसमूहास्तैः दुर्दिनस्य मेघच्छन्नदिवसस्य या संभावना द्रष्टृलोककर्तृका तस्या उद्भावने विषये निपुणैः ॥ तथा ॥ स्वीयेति ॥ स्वीया याः क्ष्वेडाक्रीडाः सिंहनादलीलास्तासां व्याजेन मिषेण स्तनितस्य मेघगर्जितस्य या शंका तस्याः प्रवर्धकैः ॥ तथा ॥ अतीति ॥ अतिरभसेनाऽतिवेगेन यच्चलनं गमनं तेन समुद्भूतो यो घर्मौघः स्वेदसमूहस्तेन वर्षतौर्यत्करणं तद्विषये प्रगल्भैः ॥ १३ ॥

**ननु चापशकलप्रदर्शनव्याजेन शिक्षितमिदं प्रभुणा॥प०॥सगुणः सुवंशजः खलु पूज्योऽपि श्रीयुतस्यबलयुक्तः॥ तदपि हि निर्व्यापारो भंगमुपैति क्ष**





**णात् कुसंगवशात्॥ २३ ॥**

नन्विति ॥ प्रभुणा श्रीकृष्णेन चापशकलप्रदर्शनव्याजेन करधृतचापखंडप्रदर्शनमिषेण इदं वक्ष्यमाणं शिक्षितं ननु लोकान् प्रतीत्यर्थः ॥ तदाह ॥ सगुणइति ॥ यद्यपीति शेषः ॥ सगुणः गुणैः सहितः सुवंशजः उत्तमवंशोत्पन्नः पूज्यः श्रीयुतस्य श्रीमतो बलयुक्तः एवंविधोऽपि कश्चिदिति शेषः अस्ति खलु तदपि तथापि यदि निर्व्यापारः व्यापाररहितस्तिष्ठेत्तर्हि कुसंगवशात् कुत्सितसंगवशात् क्षणात् अविलंबेनेत्यर्थः ॥ भंगं पराभवमुपैति ॥ हि प्रसिद्धं ॥ चापोऽपि यद्यपि सगुणः मौर्वीसहितः सुवंशजः उत्तमवेणुजन्यः यतः श्रीयुतस्य विषयुक्तस्य शंकरस्य संबंधी अतः पूज्यः पूजार्हः बलयुतो दृढः सैन्ययुक्तो वा अस्ति तथापि यतो निर्व्यापारः अतः कुसंगवशात्सर्वदा पूजार्थं पृथ्वीनिहितत्वेन तत्संगवशात् कुत्सितस्य कंसस्य संगवशाद्वा क्षणमात्रेण भंगं छेदं प्राप्तवान् ॥ एवंच भगवतैतादृक्चापभंजनेन पूर्वोक्तविधस्य पुरुषस्यैवमेव भंगो भवेदितिलोकान् प्रति शिक्षितमिति भावः ॥ ॥ २३ ॥

**ग०॥तदनंतरं निजभुजदंडप्रचंडप्रतापाऽनलप्ररोहैरिव प्रदीपाऽकुरैरोजायमानेषु यदुनगरलयनेषु सत्सु तदागामिशोभाभरलज्जावशादिव पश्चिमार्णवे कृतनिमज्जने ऽर्णोजबंधौ कृतनिजस्थानगमनमतिं यदुपतिं प्रति हलायुधः पुरश्रियमालोक्य दीपमुद्दिश्यैवं गिरमुद्दीपयांचकार ॥ १४॥**

नदनंतरमिति ॥ तदनंतरं धनुर्भंगाऽनंतरं हलायुधो बलदेवः पुरश्रियमालोक्य कृतनिजस्थानगमनमतिं यदुपतिं श्रीकृष्णं प्रति लक्षीकृत्य दीपमुद्दिश्य एवं वक्ष्यमाणप्रकारां गिरं वाणीं उद्दीपयांचकार प्रकाशितवान् उक्तवानित्यर्थइत्यन्वयः ॥ कस्मिन् सति ॥ यदुनगरलयनेषु लीयंते जना येषु तानि लयनानि गृहाणि॥ अधिकरणे ल्युट् ॥ यदुनगरसंबंधीनि यानि लयनानि तेषु प्रदीपांकुरैरोजायमानेषु ओजस्विवदाचरत्सु सत्सु ॥ कर्तुः क्यङ् सलोपश्चेति क्यङि ततः शानचि रूपं ॥ ओजः शब्दस्य वृत्तिविषये तद्वत्परत्वं ॥ ओजो दीप्तौ बले इत्यमरः ॥ दीपेषूत्प्रेक्षते ॥ निजेति ॥ निजभुजदंडसंबंधी यः प्रचंडः प्रतापएवाऽनलोऽग्निस्तस्यप्ररोहैरंकुरैरिव ॥ तथा ॥ तदागामीति ॥ तैर्दीपैः कृत्वा आगामी आगमिष्यन् यः शोभाभरस्तेजस्वित्वप्रयुक्तप्रकाशशोभातिशयस्तेन या लज्जा तद्वशादिव अर्णोजबंधौ सूर्ये पश्चिमार्णवे पश्चिमसमुद्रे कृतनिमज्जने सति अस्तं गते सतीति यावत् ॥ १४॥

**प० ॥ स्निग्धःसद्गुणवानपि तमोविनाशात्परप्रकाशपरः॥ श्रितसत्पात्रो दीपः सच्चय इव कृष्णकर्माऽपि॥ २४॥**

यदुक्तवांस्तदाह ॥ स्निग्धइति ॥ अयिकृष्ण दीपः कृष्णकर्मा कृष्णं लक्षणया कज्जलं तज्जनकं कर्म यस्य स तथाविधः ॥ श्लेषेण कृष्णं कृष्णवर्णं पापजनकत्वात् एवंविधं कर्म यस्य स तथाविधः पापकर्मेत्यर्थः ॥ एवंविधोऽपि सच्चय इव साधुसमुदाय इव अस्तीति शेषः ॥ कीदृशो दीपः सच्चयश्च ॥ स्निग्धः स्ने-



हविशिष्टः तैलपूर्ण इति यावत् ॥ पक्षे सर्वभूतसुहृत् ॥ तथा ॥ सद्गुणवान् संत उत्तमा ये गुणास्तंतवो वर्तिरूपास्तद्वान् ॥ पक्षे दयादाक्षिण्यादिगुणवान् ॥ तथा ॥ तमोविनाशात् अंधकारनाशाद्धेतोः परप्रकाशपरः परेषामन्येषांप्रकाशे परस्तत्परः अथवा उत्कृष्टप्रकाशतत्परः पक्षे अज्ञाननाशात्परस्य ब्रह्मणः प्रकाशे परस्तत्परः यद्वा परेषां प्रकाशे तद्गुणवर्णनादिना ऽतिप्रसिद्धौ तत्परः ॥ तथा ॥ श्रितेति ॥ श्रितं सदुत्तमं पात्रं येन स तथाविधः॥ पक्षे श्रितं सत्पात्रं दानाद्यर्थं येन स तथाविधः ॥ २४॥

**ततःपरम्॥ पौरांतःकरणैरिव गोपाऽर्भैः संवृतः स्ववासभुवं ॥ सोऽगान्निद्राऽपि द्राग्भुक्तवतोऽस्येक्षणांऽबुजे सुखदा॥ २५॥**

ततःपरमिति ॥ उत्तरान्वयि॥ पौरांतःकरणैरिति ॥ ततः परं बलरामवाक्यश्रवणाऽनंतरं पुरशोभाऽवलोकनाऽनंतरंवा ॥ सः श्रीकृष्णः पौरांतःकरणैः पौराणां पुरसंबंधिजनानां यान्यंतःकरणानि स्वदर्शनप्रभावात् स्वस्मिन् संसक्तानि मनांसि तैरिव गोपाऽर्भैः गोपबालकैः संवृतः सन् स्ववासभुवं अगात् ॥ सुखदा निद्राऽपि भुक्तवतः कृतभोजनस्याऽस्य श्रीकृष्णस्य ईक्षणांऽबुजे नेत्रकमले द्राक् शीघ्रं अगात् ॥ स्ववासं गत्वा क्षीरोपसेचनं भुक्त्वा सुखेन सुप्तवानित्यर्थः ॥ २५ ॥

**इतः परम्॥ पुष्करमिव पुष्करजं पुष्करदेशे विलोक्य पुष्करपे॥ कुर्वंति करप्रसारं ग्लानिप्रद इति स सर्प तेषां सः॥ २६॥**

इतःपरमिति ॥ उत्तरान्वयि ॥ पुष्करमिति ॥ इतःपरं निद्राऽनुभवाऽनंतरं निशाऽवसाने इति यावत् पुष्करपे पुष्कराणि पद्मानि पातीति पुष्करपः सूर्यस्तस्मिन् पुष्करदेशे आकाशदेशे अथच जलदेशे पुष्करजं पुष्करे जले जातः पुष्करजस्तं जलजं चंद्रं पुष्करमिव पद्ममिव विलोक्य ॥ पुष्करं खेंऽबुपद्मयोरितिमेदिनी ॥ करप्रसारं किरणप्रसारं कुर्वति सति सः चंद्रः अहं तेषां कमलानां ग्लानिप्रदोऽस्मि इति विचार्यैवेति गम्योत्प्रेक्षा ॥ ससर्प भयेन दूरं गतवान् ॥ अस्तं गतवानित्यर्थः ॥ २६ ॥

**ग० ॥ तदात्वे दनुजमनुजेशाय देयां दीर्घनिद्रां द्रागाकारयितुं यदुनंदनेन कृताऽभ्यनुज्ञेव निशया समं सरागमपि तन्नयनकमलयमलमरागेव समुत्सृज्य निद्रा द्रुतं निर्जगाम ॥ १५ ॥**

तदात्वेइति ॥ तदात्वे निशावसानसमये निद्रा अरागेव प्रेमरहितेव सरागमपि प्रेमसहितमपि अथच निद्राविघटनप्रयुक्तरक्तिम्ना सहितं एवंविधमपि तन्नयनकमलयमलं श्रीकृष्णनेत्रकमलयुग्मं समुत्सृज्य निशया राज्या समं सह द्रुतं शीघ्रं निर्जगाम ॥ अत्रोत्प्रेक्षते ॥ दनुजेत्यादि ॥ यदुनंदनेन कृष्णेन दनुजो दैत्यरूपो यो मनुजेशः कंसस्तस्मै देयां दीर्घनिद्रां द्राक् शीघ्रं आकारयितुं कृताऽभ्यनुज्ञेव ॥ १५ ॥

**तदानीं तत्सामयिकरामणीयकमवलोक्य यदुमणिः सीरपाणिमेवं वाणीमभाणीत् ॥ १६ ॥**



तदानीमिति ॥ प्रातःकाले यदुमणिः श्रीकृष्णः ॥ तत्सामयिकेति॥ स समयः प्राप्तो ऽस्य तत्सामयिकं ॥ समयस्तदस्य प्राप्तमिति ठक् ॥ शिवभागवतादिवद्युगपद्वृत्तिद्वयं ॥ एवंविधं यद्रामणीयकं तत् प्रातःकालिकीं शोभामिति यावत् अवलोक्य सीरपाणिं बलरामं प्रति एवं वक्ष्यमाणप्रकारां वाणीं अभाणीत् उक्तवानित्यर्थः ॥ १६ ॥

**प० ॥ सवितारं सोद्योगं स्पर्शे मत्वा करैरपससार॥ रात्रिर्भर्तरि मलिने याते त्यक्त्वांऽबरं सती युक्तं॥ ॥ २७॥**

सवितारमिति ॥ रात्रिः मलिने हीनतेजसि भर्तरि चंद्रे याते गते सतीति यावत् ॥ अहो आश्चर्ये सवितारमपि सूर्यमपि श्लेषेण पितरमपि करैः किरणैः अथच हस्तैः कृत्वा स्पर्शे विषये सोद्योगं विपरीतभावनया शरीरस्पर्शं कर्तुं कृतोद्योगं मत्वेवेति गम्योत्प्रेक्षा ॥ अंबरं आकाशं अथच वस्त्रं त्यक्त्वा ॥ त्यक्तलज्जोऽयं सविता कदाचिद्वस्त्रं धृत्वा बलात्कारेण शरीरस्पर्शं कुर्यादिति विचार्य झटिति निर्गमनाय वस्त्रमपि विहायेत्यर्थः ॥ अपससार गतवती युक्तमेतत् ॥ कुत इत्यत आह ॥ यतः सती पतिव्रता॥पतिव्रतानां पत्युरसन्निधाने प्राप्ताया आपदो येन केनाऽपि प्रकारेण निवारणं कृत्वा पत्यनुसरणस्यैव धर्म्यत्वाद्युक्तमेतदिति भावः ॥ २७ ॥

**किंच ॥पार्श्वेऽग्नावीशाने प्राची सत्यपि निरंतरं चित्रं॥ स्वस्थे भर्तरि रागान्मित्रकरा ऽऽमृश्यतां समनुभवति॥ २८॥**

किंचेति॥पार्श्वइति॥प्राची दिक् भर्तरि इंद्रे स्वस्थे स्वर्गस्थे सति श्लेषेण भर्तरि पत्यौ स्वस्थे सुखिते सति पार्श्वे पार्श्वभागे अग्नौ आग्नेय्याधिपतौ तथा ईशाने ईशान्यधिपतौ निरंतरं सत्यपि विद्यमानेऽपि रागात् प्रेम्णा नतु बलात्कारेण॥मित्रेति॥मित्रस्य सूर्यस्य करैरामृश्यतां स्पृश्यत्वं श्लेषेण सख्युः करेणाऽऽमृश्यतां सख्या साकं रमणमिति यावत् सम्यक् अनुभवति चित्रमेतत्॥भर्तरि सुखिते सत्यप्यग्नीशानयोश्च निरंतरं पार्श्ववर्तित्वेऽपि प्रेम्णा मित्रकरस्पृश्यत्वमनुभवतीति श्लेषमूलकंचित्रमिति भावः ॥ २८ ॥

**ततः प्रथमतः प्रीत्या प्रभुः प्रावर्तताऽनुगैः॥ निर्वर्तनीयसुविधौ विधौ मोदप्रवर्तकः॥ २९॥**

ततइति॥एवं भाषणाऽनंतरं सूर्योदयाऽनंतरं वा प्रभुःश्रीकृष्णः प्रथमतः अनुगैर्गोपैस्सह प्रीत्या निर्वर्तनीयसुविधौ निर्वर्तनीयः संपादनीयो यः सुविधिःप्रातस्तनस्नानादिविधिस्तस्मिन् प्रावर्तत प्रवृत्तोऽभूत्॥प्रीत्येत्यनेन करिष्यमाणकंसहननस्य सुकरत्वं सूचितं॥कीदृशः प्रभुः॥विधौ स्वकुलकूटस्थे चंद्रे देवानां कार्यकरणाद्ब्रह्मणि वा मोदप्रवर्तकः हर्षप्रदायकः ॥ २९ ॥

**ग० ॥ अथ तत्र तावदजस्रपरुषरोषाऽनलशबलाऽऽशयनिजप्रबलबलयोधकुलं कोदंडशकलाभ्यां कृतशकलं समाकर्ण्य साध्वसाऽतिचकितः कुणपादकुनाथ आगामिमहासुषुप्तिभयेनेव स्वीकृतकांदिशीकतया सुषुप्त्या परित्यक्तस्तया गमनोत्सुक**



**या पुरःप्रेषितैरनुचरैरिव दुःस्वप्नैः समाकुलहृद्देशः कंसः शयनात्समुत्थाय सकाशमुपगताननुगान्प्रतीत्थंगामुत्थापयांबभूव॥ १७॥**

अथेति॥अथ चापरक्षकवधाऽनंतरं॥अर्थांऽतरोपक्रमे वा ऽथशब्दः॥ तत्र तावत् प्रातःकाले कंसः शयनात्समुत्थाय सकाशं स्वसमीपं उपगतान् प्राप्तान् अनुगान् अनुचरान् प्रति लक्षीकृत्य इत्थं वक्ष्यमाणप्रकारां गां वाणीं उत्थापयांबभूव॥आज्ञप्तवानित्यर्थः॥कीदृशः कंसः॥अजस्रेत्यादि॥अजस्रं निरंतरं परुषाः क्रूराः रोषः क्रोध एवाऽनलोऽग्निस्तेन शबला युक्ता आशया अंतःकरणानि येषां ते तथाविधाश्च ये निजस्य स्वकीयस्य प्रबलस्य बलस्य सैन्यस्य संबंधिनो योधाश्चापरक्षिणो भटास्तेषां यत्कुलं समूहस्तत् कोदंडशकलाभ्यां धनुःखंडाभ्यां कृतशकलं कृतखंडं नाशितमिति यावत् अर्थात्कृष्णेन एवंविधं सम्यक् आकर्ण्य श्रुत्वा साध्वसेन भयेन अतिचकितः अतिशंकितः यद्वा अतिचकितः प्रतिहतः ॥ चकतृप्तौ प्रतीघातेच॥तथा॥कुणपादानां दैत्यानां कुनाथः पृथ्वीपतिः राजा कुत्सितो नाथ इति वा ॥ तथा ॥ आगामीति ॥ आगामिनी या महासुषुप्तिः दीर्घनिद्रा तस्या भयेनेव ॥ स्वीकृतेति ॥ स्वीकृता अंगीकृता कांदिशीकता भयद्रुतता ययैवंविधया सुषुप्त्या निद्रया परित्यक्तः ॥ तथा ॥ आगमनविषये उत्सुकया तया दीर्घनिद्रया पुरः अग्रे प्रेषितैरनुचरैरिव दुःस्वप्नैः समाकुलहृद्देशः ॥ १७ ॥

**प० ॥ आहूयंतां सुमल्लाः प्रबलतलरवैर्नादयंतो दि**

**गंतान् सज्जंतां रंगमंचास्तदुपरि ससुखं पौरवर्गाः स्वमुख्याः ॥ तिष्ठंतु स्कन्नदानप्रस्तृतकरटसुस्निग्ध सिंदूरबिंदू रक्तांगो द्राक्करींद्रो मदबलविकलो द्वारि केलिं करोतु ॥ ३० ॥**

तमेवाऽऽज्ञाप्रकारमाह ॥ आहूयंतामिति॥हे अनुचराः भवद्भिरिति-शेषः सुमल्लाश्चाणूराद्य आहूयंतां आकारणीयाः ॥ कीदृशाः सुमल्लाः॥ प्रबलतलरवैः प्रबला महांतो ये तलानां चपेटानां रवाः शब्दास्तैर्दिगंतान् नादयंतः ॥ तथा रंगमंचाः रंगस्य मल्लक्रीडा-स्थानस्य संबंधिनो मंचाः सज्जंतां सज्जा भवंतु ॥ तदुपरि मंचो-परि स्वमुख्याः स्वस्वजातिमुख्याः पौरवर्गाः ससुखं यथा स्यात्त-था तिष्ठंतु ॥ तथा ॥ स्कन्नानि गलितानि यानि दानानि मदो-दकानि तैः कृत्वा प्रस्तृताः करटसंबंधिनोगंडसंबंधिनस्सुस्निग्धाः सिंदूरबिंदवो यस्य स तथाविधः॥ अतएव रक्तांगः मदबलेनोन्मा-दप्रभावेण विकलः प्रकृतिवैपरीत्यशाली करींद्रः कुवलयाऽऽपी-डाख्यो गजश्रेष्ठः द्राक् शीघ्रं द्वारि रंगद्वारे केलिं क्रीडां करोतु ॥ द्वारि रोधनार्थं कुवलयाऽऽपीडो गजः स्थापनीयइत्यर्थः ॥ ३०॥

**ग०॥ तदनंतरं विविधाऽनर्घ्यरत्नसंघघृष्टिप्रसरकिर्मीरितदिगंतरोत्तुंगभूमिभर्तस्वर्णसिंहासनं परितोऽनेकपंचमंचचयरमणीयं विशदमंकुरायमाणमणिभित्तिद्विगुणितसमग्रवस्तुजातं पुरतः पाटी**





**रनीरसेचनससौरभमृदुलरेणुनिचयसुखदेन रंगस्थलेन हृद्यं पृथुलाऽवलग्नघनलग्नकच्छानां बलाऽवलेपाऽऽसवक्षीबानां सुप्रबलमल्लमल्लानां मृदुधूल्युद्धूलनधूसरविपुलदोर्दंडाऽऽस्फोटैर्वाचाटितं विशदचलत्कर्णतालोद्धूतशिरःकुंभविषक्तसिंदूरदूरप्रसरेण तदवसरेऽपि संध्याऽभ्रभ्रममुत्पादयतः स्थूलशुंडादंडपुष्करेऽर्थांतरं सार्थकयितुमिव फूत्कारशब्देन सह सलीलं सलिलसीकरांस्तस्माद्वर्षतःसद्यो हरिकरस्पर्शान्मम संसारशृंखलोत्सृष्टिर्भविष्यतीति सूचयत इव विराविणीमयःशृंखलां पुनःपुनः कराग्रेणोत्सृजतस्तीक्ष्णदृढसृणिकलितकरांचलेनाऽवष्टेनाऽधिष्ठितकंधराप्रदेशस्य मत्तमातंगस्य बृंहितघंटाघणत्काराभ्यामपि परिपुष्टाऽवकाशं कौतुकाऽवलोकनाऽऽगतनागरिककलकलाऽवकलितं किल सभास्थलं समासाद्य वज्रगारुत्मतेंद्रनीलसुवर्णदुर्वर्णवेत्रधरैरितस्ततो निवार्यमाणेषु जनेषु सकलैः सभ्यैरभ्युत्थानादिभिः कृतसत्कारश्चितारोषदूषितहृदयः कंसो निरवकाशतया शयदेशादतिप्रबलपरिपुष्टया तया बहिर्निःसार्यमाणमिवाऽतिभीषणभ्रुकुटिभंगभयान**

काभ्यां दृक्कुहराभ्यां क्रूरं क्रोधाऽग्निमुद्वमंस्तस्थौ ॥
॥ १८ ॥

अथ कंसस्य सभाप्रवेशमाह ॥ तदनंतरमित्यादिगद्येन ॥ तदनंतरं
स्वाऽऽज्ञानुरूपरंगसज्जीकरणाद्यनंतरं कंसः सभास्थलमासाद्य प्रा-
प्य तस्थौ इत्यन्वयः॥कस्मिन्सति॥वज्रेति॥वज्राणि हीरकाः गारु-
त्मतानि मरकतानि इंद्रनीलाश्च सुवर्णं च दुर्वर्णं रजतं च एतेषां
द्वंद्वे एतैर्निर्मितानि यानि वेत्राणि यष्टयस्तेषां धरा धारकास्तैः॥अ-
थवा वज्रगारुत्मतेंद्रनीलखचितानि यानि सुवर्णदुर्वर्णनिर्मितानि
वेत्राणि तेषां धरास्तैः वेत्रधारिभिः पुरुषैः जनेषु लोकेषु इतस्ततो
निवार्यमाणेषु सत्सु ॥ कीदृशः कंसः ॥ सकलैरित्यादिकृतसत्का-
रइत्यंतं ॥ स्फुटं ॥ पुनःकी०॥ चिंतेति ॥ स्पष्टं ॥ तथा ॥ अतिभी-
षणेति ॥ अतिभीषणे ये भ्रुकुटी तयोर्भंगो वक्रीकरणं तेन भया-
नकाभ्यां दृक्कुहराभ्यां दृशौ दृष्टी एव कुहरे बिले ताभ्यां क्रूरं
क्रोधाग्निमुद्वमन् अतिक्रोधवशादारक्तनयनइत्यर्थः॥एतेन दृष्ट्यो-
र्दुर्दर्शत्वं सूचितं ॥ अत्रोत्प्रेक्षते॥अतिप्रबलपरिपुष्टया अतिप्रबला
चाऽसौ परिपुष्टा धनुर्भंगादिना पुष्टिं प्राप्ता तयैवंविधया तया चिं-
तया कर्त्र्या आशयदेशात् हृदयदेशात् सकाशात् निरवकाशत-
या स्वपूरणेनेतरनिवेशाऽवकाशराहित्येन हेतुना बहिर्निस्सार्यमा-
णमिव ॥ किल प्रसिद्धौ ॥ कीदृशं सभास्थलं ॥ विविधेति ॥ वि-
विधान्यनेकजातीयानि अनर्घ्याणि अमूल्यानि यानि रत्नानि
तेषां यः संघस्तत्संबंधी यो घृष्टिप्रसरः किरणप्रसरणं तेन किर्मी-
रितानि चित्रितानि दिगंतराणि येनैवंविधं उत्तुंगं उच्चं च भूमिभ-
र्तुः राज्ञः कंसस्य स्वर्णसिंहासनं यस्मिंस्तत् ॥ तथा ॥ परितः भूप-



तिसिंहासनस्य सर्वतः ॥ अनेकेति ॥ अनेके पंचा विस्तृता ये मं-
चास्तेषां चयेन रमणीयं ॥ तथा ॥ विशदेत्यादि ॥ विशदा निर्म-
ला ये मंकुरा दर्पणास्तद्वदाचरंत्यो या मणिभित्तयस्ताभिर्द्विगुणि-
तं प्रतिबिंबवशात् द्वैगुण्यं प्रापितं समग्रवस्तूनां जातं समूहो य-
स्मिन्नेवंविधं ॥ मंकुरशब्दस्तु दर्पणे मुकुरादर्शावित्यमरव्याख्यायां
मंकुरइत्यपीत्यादिना दर्शितः॥ जातं व्यक्त्योघजन्मस्वितिमेदिनी॥
तथा ॥ पुरतः प्रथमं मंचमंडलाऽग्रभागे वा ॥ पाटीरेति ॥ पाटी-
रनीरस्य चंदनवारिणः सेचनेन ससौरभः सौगंध्यसहितो मृदुलो
यो रेणुनिचयस्तेन कृत्वा सुखदेन रंगस्थलेन मल्लक्रीडास्थानेन
हृद्यं ॥ तादृशरेणुनिचये क्रीडया निपतनेऽपि तूलराशाविव सु-
खोदयात् रंगस्थलस्य सुखदत्वं बोध्यं ॥ तथा॥पृथुलेत्यादिवाचा-
टितमित्यंतं॥पृथुलानि महांति यान्यवलग्नानि मध्यभागास्तेषु घनं
दृढं यथा तथा लग्नाः कच्छाः परिधानांऽचला येषां तेषां ॥ परि-
धानांऽचले कच्छ इति क्षिप्तच्छांतवर्गेऽमरः ॥ बलावलेप एव ब-
लवर्गएवाऽऽसवोमद्यं तेन क्षीबानां मत्तानां सुतरामत्यंतं प्रबलाये
मल्लमल्लाः प्रशस्तमल्लास्तेषां॥मृद्धिति॥मृद्धी या धूलिस्तस्या उत्धूल-
नेन धूसराः विपुलाश्च ये दोर्दंडास्तेषामास्फोटैस्तलताडनैः वाचा-
टितं शब्दायमानं कृतं ॥ तथा॥ मत्तमातंगस्य द्वारदेशाऽधिष्ठितस्य
कुवलयाऽऽपीडस्य ॥ बृंहितेति ॥ बृंहितं गर्जितं घंटानां घण-
त्कारः शब्दश्च ताभ्यां परिपुष्टाऽवकाशं ॥ कीदृशस्य मत्तमातंग-
स्य ॥ विशदेति ॥ विशदो निर्मलः चलत्कर्णतालाभ्यामुत्धूत उ-
च्छलितः एवंविधः शिरःसंबंधिनोः कुंभयोः पिंडयोर्विषक्तः संब-
द्धो यः सिंदूरस्तस्य दूरप्रसरेण ऊर्ध्वगमनेन ॥ कुंभौ तु पिंडौ शि-

रस इत्यमरः ॥ तदवसरे प्रातः प्रहराऽधिककाले ऽपि संध्याभ्रभ्रमं संध्याकालीनानामभ्राणां मेघानां भ्रमं संध्याकालीनाऽऽकाशभ्रमं वा उत्पादयतः ॥ सर्वतो रक्तीकरणादिति भावः ॥ तथा ॥ स्थूलेति ॥ स्थूलो यः शुंडादंडस्तत्संबंधि यत्पुष्करं अग्रभागस्तस्मिन् अर्थांऽतरं अन्योऽर्थ इत्यर्थांऽतरं आकाशरूपं सार्थकयितुं यथार्थीकर्तुमिव ॥ तस्मात् पुष्करात् फूत्कारशब्देन सह सलीलं सक्रीडं यथा तथा सलिलसीकरान् जलकणान् वर्षतः ॥ सशब्दजलवृष्टेराकाशादेव भवनादेवमुक्तिः ॥ तथा ॥ हरिकरस्पर्शान्मम संसारश्रृंखलोत्सृष्टिः संसारश्रृंखलाया उत्सर्गः उच्छेद इति यावत् सद्यो भविष्यतीति सूचयतइवेत्युत्प्रेक्षा ॥ विराविणीं सशब्दां अयःश्रृंखलां लोहशृंखलां कराऽग्रेण शुंडाग्रेण पुनःपुनर्वारंवारं उत्सृजतःक्षिपतः ॥ गजः स्वशुंडादंडे दीयमानां लोहशृंखलां त्यजति पुनर्गृण्हातीति तज्जातिस्वभावः ॥ तथा ॥ तीक्ष्णेति ॥ तीक्ष्णो दृढश्च यः सृणिरंकुशस्तेन कलितं युक्तं करांचलं यस्य तेन तथाविधेनाऽम्बष्ठेन एतदभिख्येन हस्तिपकेन अधिष्ठितः कंधराप्रदेशो ग्रीवाप्रदेशो यस्य तस्य ॥ पुनःकीदृशं सभास्थानं ॥ कौतुकेत्यादि ॥ कौतुकेनाऽवलोकनार्थमागता ये नागरिका नगरसंबंधिनो जनास्तेषां कलकलेन अवकलितं व्याप्तं ॥ १८ ॥

**प०॥ढक्काढक्कारमिश्रं प्रबलतररवं दुंदुभीनां तदानीं प्रत्याशं नव्यमेघस्तनितसरवमहो केकिनस्तं निशम्य॥ चक्रुः कोलाहलं ते रुचिरहरिरुचा ऽऽक्षिप्तचि**



**त्ताःसशीघ्रं गंतुं रामेण शौरीरिपुनृपसविधं मल्लरंगे मतिं च॥ ३१॥**

ढक्केति ॥ तदानीं कंसस्य सभाप्रवेशाऽवसरे ते उपवनस्थाः केकिनोमयूराः ढक्कानां यशःपटहानां यो ढक्कारः शब्दविशेषस्तेन मिश्रं युक्तं ॥ तथा ॥ दुंदुभीनां भेरीणां ॥ नव्येति ॥ नव्या नवीना वर्षारंभकालिका ये मेघास्तेषां यत् स्तनितं गर्जितं तस्य सरवा सदृश इति नव्यमेघस्तनितसरवस्तं ॥ राजाहःसखिभ्य इति टच् ॥ तथाविधं ॥ तं रंगस्थानसंभूतं प्रबलतररवं प्रत्याशं प्रतिदिशं निशम्य ॥ रुचिरेति ॥ रुचिरा या हरेः श्रीकृष्णस्य रुक् नीलमेघसदृशी कांतिस्तया आक्षिप्तचित्ताः आक्षिप्तं मेघभ्रांत्या विचलितं चित्तं येषां ते तथाविधाः संतः कोलाहलं चक्रुः ॥ अहो आश्चर्ये ॥ स च शौरिः श्रीकृष्णः रामेण सह मल्लरंगे रिपुनृपसविधं कंससमीपे शीघ्रं गंतुं मतिं चक्रे ॥ स्रग्धरा वृत्तम् ॥३१॥

**ग० अनंतरमसौ दृढतरनिबद्धमल्लपरिकरो घुसृणमिश्रणमसृणाऽगुरुपंकचर्चितविग्रहः सबलः प्रबलबल्लवबालककुलसंकुलपार्श्वप्रदेशो व्रजेशोऽत्युत्साहमुद्वहन् शनैःशनै राजपथेन राजसदनद्वारमाससाद॥ १९॥**

अनंतरमिति ॥ गमनबुद्धिकरणानंतरं असौ सबलो बलदेवसहितो व्रजेशः श्रीकृष्णः अत्युत्साहं उद्वहन् सन् शनैः शनैःराजपथेन राजसदनद्वारमाससाद प्राप्तवानित्यन्वयः ॥ कीदृशो व्रजेशः ॥ दृढतरेति ॥ दृढतरं यथा तथा निबद्धो मल्लानां परिकरइव परिक-

रः कटिबंधादिरूपो येन स तथाविधः ॥ भवेत्परिकरो व्राते पर्यंकपरिवारयोः ॥ प्रगाढगात्रिकाबंधे विवेकारंभयोरपीति विश्वः ॥ तथा ॥ घुसृणेति ॥ घुसृणस्य कुंकुमस्य मिश्रणेन मसृणश्चिक्कणो यो ऽगुरुपंकस्तेन चर्चितो विग्रहो देहो यस्य स तथाविधः ॥ चिक्कणं मसृणं स्निग्धमित्यमरः ॥ तथा ॥ प्रबलेति ॥ स्पष्टं ॥१९॥

**तत्र ॥ प० ॥ स्तंबेरमं वीक्ष्य नृपेंद्रकक्षाक्रीडं तमेतं यमराजधान्याः ॥ वने तथाभूतमिमं विधातुं मनो दधे सन्निदधे क्षणात्सः ॥ ३२ ॥**

स्तंबेरममिति॥तत्र राजद्वारे सः श्रीकृष्णः नृपेंद्रस्य कंसस्य कक्षायां बाह्यवितर्दिकायां क्रीडा यस्य तं ॥ एतं समीपवर्तिनं तं स्तंबेरमं कुवलयापीडनामानं गजं वीक्ष्य इमं गजं यमराजधान्याः वने तथाभूतं क्रीडंतं विधातुं कर्तुं हंतुमित्यर्थः ॥ मनो दधे धृतवान् क्षणात्सन्निदधे च समीपं प्राप ॥ उपजातिर्वृत्तं ॥ ३२ ॥

**प्रहसन् प्रभुः प्राह चेदम् ॥ अंबष्ठांऽबष्ठशिष्टानां रोधो न क्वाऽपि विश्रुतः ॥ कष्टं स्पष्टो नृपद्वारि दृष्टोऽयं दिष्टतो मया ॥ ३३ ॥**

प्रहसन्निति ॥ स्पष्टं ॥ अंबष्ठेति ॥ हे अंबष्ठअंबष्ठ॥ संभ्रमे द्विर्भावः ॥ यद्यपीति शेषः शिष्टानां रोधो रोधनं क्वाऽपि न विश्रुतोविख्यातोऽस्ति तथापि अयं शिष्टरोधः मया दिष्टतो दैवेन वस्तुतस्तु मरणपर्यवसायिना त्वददृष्टेन नृपद्वारि स्पष्टो दृष्टः कष्टमेतत् ॥ ॥ ३३ ॥

**नाम्ना वारणमेतं मत्वा त्वं वारणं त्वघो कुरु मा ॥**



**मार्गस्य नो नु नो चेदस्माभिर्वा रणं क्षणाद्भविता ॥ ॥ ३४ ॥**

नाम्नेति ॥ अथो हे अघवन् अंबष्ठ एतं कुवलयाऽऽपीडाख्यं गजं नाम्ना वारणं वारयतीति वारणस्तं तथाविधं मत्वा त्वं नः मार्गस्य वारणं निवारणं माकुरु ॥ नोचेत् निवारणाभावो न चेत् अस्मान्निवारयिष्यसि चेत् अनु पश्चात् अस्माभिः सह क्षणात् रणं वा युद्धमेव भविता भविष्यति वा एवाऽर्थे ॥ वाइत्यस्य भवितेत्यनंतरं वा योजना ॥ भवितैवेत्यर्थः ॥ अस्त्रियां समराऽनीकरणा इत्यमरः ॥ नः अनु इति च्छेदः ॥ ३४ ॥

**ग० ॥ इत्थंविधप्रभुक्षुरप्रवचनप्रकरेंधनसंधुक्षितक्रूरधनंजयेनाऽनुमोदितोंऽबष्ठः प्रचंडं शुंडालं सृणिघातेन द्रुतं प्रणोदयामास ॥ २० ॥**

इत्थमिति ॥ अंबष्ठः प्रचंडं क्रूरं शुंडालं गजं सृणिघातेनांऽकुशप्रहारेण द्रुतं शीघ्रं प्रणोदयामास प्रेरितवान् ॥ कीदृशोंऽबष्ठः ॥ इत्थंविधेति ॥ इत्थंविधः पूर्वोक्तप्रकारो यः प्रभोः श्रीकृष्णस्य क्षुरप्रो बाणविशेषसदृशस्तीक्ष्ण इति यावत् एवंविधो यो वचनप्रकरः वचनसमूहः स एवेंधनं तेन संधुक्षितः प्रज्वालितो यः क्रूरक्रोधएव धनंजयोऽग्निस्तेनाऽनुमोदितः ॥ भगवद्वचनश्रवणजनितक्रोधाऽऽवेशेन युक्त इत्यर्थः ॥ २० ॥

**तदानीं ॥ प० ॥ करपुष्करलभ्योऽसौ पुष्करनेत्रस्तथा**

**विधैर्हि जनैः॥ इति तत्प्रसारमकरोत्तं कर्तुं तादृशं स मातंगः॥ ३५॥**

तदानीमिति ॥ प्रेरणसमये ॥ करेति ॥ स मातंगः कुवलयाऽऽपीडाऽऽख्यो गजः पुष्करनेत्रः कमलनयनः असौ श्रीकृष्णः तथाविधैर्हि पुष्करसदृशैरेव अतिकोमलैर्गोपिकादिभिरेवेत्यर्थः॥ जनैः करपुष्करलभ्यः करपुष्करेण करकमलेन लभ्यः अस्ति इति विचार्यैव तं श्रीकृष्णं तादृशं करपुष्करलभ्यं कर्तुं तत्प्रसारं करपुष्करप्रसारं अकरोत् ॥ अत्र करस्य शुंडादंडस्य संबंधि पुष्करमग्रभाग इत्यर्थो बोध्यः ॥ पुष्करं करिहस्ताऽग्रवाद्यभांडमुखे जले ॥ व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोरित्यमरः ॥ अतिमृदुजनस्य करपुष्करलभ्यत्वे महतो मम करपुष्करलभ्यः कथं न स्यादिति विचार्य तत्प्रसारमकरोदिति भावः ॥ ३५ ॥

**ग० ॥ एतदंतरे सरभसद्रुतकरींद्रकरसंवलितललितविग्रहेण कृष्णेन चंचलेन वंचयित्वा पंचपदांतरसरण्या निर्गत्य खरतरतनूरुहदुर्ग्राह्ये लांगूले करकमलेन परिगृहीतस्तरसा सुदूरमाकृष्यमाणोऽयं ततो वंचनप्रपंचसंचितरोषसप्ताऽर्चिरुदित्वरत्वरः परिवृत्त्य॥ २१ ॥ प० ॥ नागोऽप्यगाऽभिख्यया ऽसौ प्रख्यातः प्राद्रवद्धरिम्॥ चित्रं सुदर्शनं कर्तुं कुदर्शनमथ क्षणात्॥ ३६॥**





अथ स्वकरवेष्टनसमये कृष्णकृतवंचनप्रयुक्तरोषपूर्वकं कुवलयापीडस्य श्रीकृष्णं प्रति धावनप्रकारमाह ॥ एतदंतरइत्यादिना गद्येन नागोऽपीत्यादिश्लोकसहितेन ॥ अथाऽयमसौकुवलयापीडः परिवृत्त्य पश्चात्परावृत्य हरिं प्रति क्षणात् क्षणमात्रेण प्राद्रवत् ॥ किंकर्तुं ॥ सुदर्शनं शोभनं दर्शनं यस्य स सुदर्शनस्तमपि कुदर्शनं कर्तुमिति चित्रमेतत् ॥ श्लेषेण कौ पृथिव्यां दर्शनं पातनहेतुकमवलोकनं यस्य तथाविधं कर्तुं ॥ कीदृशोऽसौ ॥ एतदंतरेइत्यादि ॥ एतदंतरे पुष्करप्रसारसमये ॥ सरभसेति ॥ सरभसं सवेगं द्रुतो यः करींद्रस्तस्य करेण शुंडादंडेन संवलितः संवेष्टितो ललितो रम्यो विग्रहो देहो यस्यैवंविधेन चंचलेन चपलेन कृष्णेन कर्त्रा वंचयित्वा ॥ अर्थाद्गजमिति योज्यं॥ पंचेति॥ पंचा विस्तृता या पदांतरस्य पादमध्यस्य संबंधिनी सरणिर्मार्गस्तया निर्गत्य तत्करबंधं मोचयित्वा बहिरागत्य ॥ खरतरेति ॥ खरतराणि कठिनतराणि यानि तनूरुहाणि लोमानि तैः कृत्वा दुर्ग्राह्ये ग्रहीतुमशक्ये लांगूले पुच्छे करकमलेन परिगृहीतः ॥ तथा ॥ ततो ग्रहणाऽनंतरं तरसा बलेन वेगेन वा सुदूरमाकृष्यमाणः ॥ तथा ॥ वंचनेति ॥ वंचनस्य यः प्रपंचो विस्तारस्तेन संचितस्संवर्धितो रोष एव क्रोध एव सप्ताऽर्चिरग्निर्यस्य स तथाविधः॥ अतएव उदित्वरा उदयशीला त्वरा पुनर्ग्रहणसंभ्रमो यस्य स तथाविधः॥ तथा ॥ नागोऽपि अगो नभवतीति नागः सोऽपि अगाऽभिख्यया अगइत्यभिधानेन प्रख्यात इति विरोधाभासः ॥ परिहारस्तु नागो गजः अगस्य पर्वतस्याऽभिख्यया उच्चत्वादिप्रयुक्तया शोभया प्रख्यातः ॥ पर्वतसदृश इति यावत् ॥ २१ ॥ ३६ ॥

**ग० ॥ ततः सरभसधावनसाध्वसप्रभुप्रपतनभ्रमेण मदाऽऽविलो दंतावलः किल मदविकलो ऽतिबलेन भूतलं धवलतीक्ष्णाभ्यां दंतकुंताभ्यां त्वनया प्रार्थितो ऽयमरातिः प्रादुरभूदिति परुषरुषेव प्रहृत्य तद्दलनोच्छलद्दहलधूलिपटलेन निजप्रचलत्कर्णतालवृंतप्रभूतप्रभंजनप्रपंचप्रसरेण दिगंतरे निरंतरे स पुनरुत्थाय द्राक् प्रभुं प्राद्रवत्॥ २२॥**

ततइति ॥ ततो धावनानंतरं मदाविलः मदेन दानोदकेनाऽऽविलो व्याप्तः अतएव मदविकलः मदेनोन्मादेन विकलो व्याक्षिप्तचित्तः सः कुवलयाऽऽपीडाऽभिधो दंतावलो गजः ॥ सरभसेति ॥ सरभसं सवेगं यद्धावनं अर्थात् श्रीकृष्णं प्रति तेन यत्साध्वसं प्रभुनिष्ठभयं तेन प्रभोः श्रीकृष्णस्य यत्प्रपतनं तस्य यो भ्रमो भ्रांतिस्तेन हेतुना धवलतीक्ष्णाभ्यां दंतकुंताभ्यां दंतावेव कुंतौ प्रासौ ताभ्यां भूतलं प्रति अतिबलेन प्रहृत्य पुनरुत्थाय द्राक् शीघ्रं प्रभुं श्रीकृष्णं प्रति प्राऽद्रवत् किल ॥ पतनभ्रमप्रयुक्तभूप्रहारे हेतुमुत्प्रेक्षते ॥ अनयेत्यादि ॥ हि प्रसिद्धं अयमरातिः श्रीकृष्णः अनया भूम्या प्रार्थितः सन् स्वभारहरणायाऽभ्यर्थितः सन् प्राऽदुरभूत् इति परुषरुषेव कठोरक्रोधेनेव ॥ कस्मिन् सति ॥ निजेति ॥ निजौ प्रचलंतौ यौ कर्णौ तावेव तालवृंते व्यजने ताभ्यां प्रभूत उत्पन्नो यः प्रभंजनो वायुस्तस्य यः प्रपंचो विस्तारस्तेन प्रसरणं संचरणं यस्य तेन तथाविधेन ॥ तद्दलनेति ॥ तस्याः पृथिव्या यद्दलनं दंतप्रहारेण चूर्णनं तेनोच्छलदूर्ध्वं प्रसरद्यद्धूलिपटलं तेन



दिगंतरे निरंतरे परिपूर्णे व्याप्ते सतीति यावत् ॥ २२ ॥

**तदंतरे ॥ प० ॥ कुवलयनिलयाऽधीशः कुवलयनेत्रः करेण कंसभृतम् ॥ झटिति कुवलयापीडं त्ववधीद्युक्तं स राजनीतिपरे ॥ ३७ ॥**

तदंतरेइति ॥ उत्तराऽन्वयि ॥ कुवलयेति ॥ तदंतरे धावनाऽवसरे कुवलयं कमलं निलयो गृहं यस्याः सा कुवलयनिलया लक्ष्मीस्तस्या अधीशः स्वामी कुवलयवत् कमलवन्नेत्रे यस्य स तथाविधः सः श्रीकृष्णः कंसभृतं कंसेन भृतं पोषितं कुवलयाऽऽपीड एतन्नामकं गजं करेण स्वहस्तेन झटिति अवधीत् ॥ एतत् राजनीतिपरे कृष्णे युक्तं योग्यं ॥ श्लेषेण कुवलयं पृथ्वीमंडलं तदेवनिलयस्तस्याऽधीशः अतएव कुवलये भूमंडले नेत्रं रक्षणसमर्था दृष्टिर्यस्य स तथाविधः सः कुवलयमापीडयतीति कुवलयाऽऽपीडस्तं तत्राऽपि कंसेन हिंसकेन भृतं पोषितं अतएवाऽवधीत् ॥ एवंच स्वपत्नीनिलयस्य स्वनेत्रमित्रस्य स्वपाल्यस्वनिलयस्य च यः पीडकस्तस्य हननं राजनीतिपरस्य कृष्णस्य योग्यमेवेति भावः ॥ यद्वा राजनीतिपरे राजा मृगांके क्षत्रियेऽपि चेइत्यमरात् राज्ञश्चंद्रस्य या नीतिस्तत्परे ॥ चंद्रवंशाऽऽविर्भूतत्वाद्भगवतः ॥ एतस्य गजस्य च भूवलयपीडकत्वेन तमः सदृशत्वात् करैस्तमोहननवत् स्वकरेण गजहननं योग्यमिति भावः ॥ अस्मिन् पक्षे करेणे त्वस्याऽपि सार्थक्यं भवति ॥ अथवा कुवलयं रात्रिविकासिकमलं आपीडयतीति तथाविधस्तं अवधीत् ॥ इदं च चंद्रनीतिपरे भगवति योग्यमेव ॥ ३७ ॥

तद्धस्तः किल कंसराजकरिणं कालाऽऽलयस्थं तदा कृत्वा द्राक् कलिकालपंककलितान्राजन्यसंघान्पुनः॥ सद्भक्तोच्चयरक्षणाऽर्जितयशः सर्वान् मुदा दर्शयन् रक्ताऽऽक्तं समधात्सतद्द्विजवरं तद्राजशुभ्रप्रभम्॥ ३८॥

तद्धस्तइति ॥ तद्धस्तः श्रीकृष्णहस्तः कंसराजस्य करिणं गजं कुवलयापीडं तदा द्राक् शीघ्रं कालाऽऽलयस्थं यमगृहस्थितं कृत्वा मारयित्वेति यावत् ॥ पुनः मुदा हर्षेण ॥ कलीति ॥ कलिकालसंबंधी यः पंकः पापं तेन कलितान् युक्तान् सर्वान् राजन्यसंघान् प्रति ॥ सद्भक्तेति ॥ सद्भक्तानां य उच्चयः समूहः तस्य यद्रक्षणं तेनाऽर्जितं संपादितं यद्यशः कीर्तिस्तत् दर्शयन् किलेत्युत्प्रेक्षायां ॥ रक्ताऽऽक्तं रुधिरयुक्तं ॥ तद्राजेति ॥ तेषां द्विजानां लक्षितलक्षणया ब्राह्मणानां राजा चंद्रस्तद्वच्छुभ्रा प्रभा यस्य तं तथाविधं तद्द्विजवरं तस्य गजस्य द्विजवरं दंतश्रेष्ठं समधात् अधारयत् ॥ राजन्यसंघान् दर्शयन्नित्यत्र दृशेश्चेति ण्यंतावस्थायां कर्मत्वं ॥ दंतधारणेन शुभ्रत्वसाधर्म्यात् सद्भक्तरक्षणजन्ययशःप्रदर्शनं रक्ताक्तस्य तस्य धारणेन भवतः सर्वानेवमेव हनिष्यामीति सर्वान् प्रति बोधनं च कृतवानिति भावः ॥ शार्दूलविक्रीडितं वृत्तं ॥३८॥

ग० ॥तत्क्षणं गदाऽऽयुधोऽपिरदाऽऽयुधस्तथाविधहलाऽऽयुधाऽन्वित आधोरणधोरणीप्राणश्रेणिं सिंधुरप्राणसरणिसंचारिणीं परिकल्प्य समुत्धूतधूलिधूसरितांगः स्वेदसीकरप्रकरमदबिंदुवृंदाऽचितवदनेन सौंदर्यसदनममंदमकरंदभरमिलन्मिलिंदडिंभदलकलितेंदीवरशोभां परिहरन् गजेंद्रशिक्षितां गतिं प्रदर्शयन्निव नरेंद्रप्रघणाच्छनैः शनैरंगस्थलं समाविवेश॥ २३॥



तत्क्षणमिति ॥ तत्क्षणं गजहननाऽनंतरक्षणे गदाऽऽयुधोऽपि इदानीं रदाऽऽयुधः रदो गजदंतः आयुधं यस्य स तथाविधः ॥ तथाविधेति ॥ तथाविधो रदायुधो यो हलायुधो बलरामस्तेनाऽन्वितः ॥ समुद्धूतेति ॥ स्पष्टं ॥ तथा ॥ सौंदर्यसदनं सौंदर्यगृहं सः श्रीकृष्णः ॥ गजेंद्रेति ॥ गजेंद्रात् शिक्षितां गतिं धीरगमनं प्रदर्शयन्निव नरेंद्रप्रघणात् नरेंद्रस्य कंसस्य यः प्रघणो बहिर्द्वारप्रकोष्ठस्तस्मात् ॥ प्रघाणप्रघणाऽलिंदा बहिर्द्वारप्रकोष्ठकइत्यमरः ॥ शनैःशनैः रंगस्थलं समाविवेश प्रविष्टइत्यन्वयः ॥ किंकुर्वन् ॥ स्वेदस्य घर्मस्य ये सीकरा बिंदवस्तेषां प्रकरः मदबिंदूनां गजदानोदकपृषतां वृंदं च ताभ्यामान्वितं युक्तं यद्वदनं मुखं तेन ॥ अमंदेति॥ अमंदो ऽनल्पो यो मकरंदभरः मिलंतः मिलिंदडिंभा भ्रमरबालका येष्वेवंविधानि यानि दलानि पत्राणि च तैः कलितं युक्तं यदिंदीवरं नीलकमलं तस्य या शोभा तां परितः सर्वतो हरन् सन् ॥ उक्तविधेन वदनेनैतादृशकमलशोभां पराकुर्वन्नित्यर्थः ॥ अत्र स्वेदबिंदूनां मकरंदसादृश्यं मदबिंदूनांच श्यामत्वाद्भ्रमरडिंभसादृश्यं बोद्ध्यम्॥ किंकृत्वा॥ आधोरणेत्यादि ॥ आधोरणानां हस्तिपकानां या धोरणी परंपरा तस्याः प्राणश्रेणिं प्राणपरंपरां ॥

सिंधुरेति ॥ सिंधुरस्य कुवलयाऽऽपीडाऽऽख्यगजस्य ये प्राणास्तेषां या सरणिर्मार्गस्तस्मिन् संचरतितच्छीलां परिकल्प्य कृत्वा ॥ गजवदाधोरणानपि हत्वेत्यर्थः ॥ हस्ती महामृगः पीलुः सिंधुरो दीर्घमारुत इति त्रिकांडशेषः ॥ २३ ॥

**तदवसरे ॥ प० ॥ मत्वा वज्रधरोऽस्माञ्शैलान्किं वा मुमोच निजशस्त्रम् ॥ इति चिंताऽऽकुलहृदया मल्ला आसन्विलोक्य तं कृष्णम् ॥ ३९ ॥**

अथ मल्लानामशनिरित्यादिश्लोकोक्तान् बहुभिर्बहुधाकृतान् कांश्चिदुल्लेखान् प्रदर्शयति ॥ तदवसरे इति ॥ उत्तराऽन्वयि ॥ मत्वेति ॥ तदवसरे रंगप्रवेशसमये मल्लाश्चाणूरप्रभृतयः तं हतकुवलयाऽऽपीडं तद्दंतायुधं कृष्णं विलोक्य इति पूर्वोक्तप्रकारेण चिंताऽऽकुलहृदया आसन् ॥ इतिकिं ॥ वज्रधर इंद्रः अस्मान् शैलान् स्थूलशरीरत्वेन सादृश्यात् पर्वतान् मत्वा निजशस्त्रं वा स्वकीयं वज्राऽऽख्यमायुधमेव मुमोच किं ॥ वा एवाऽर्थे ॥ अयं श्रीकृष्णो न किंतु अस्मान् पर्वतान् ज्ञात्वा ऽस्मद्धननार्थमिंद्रेण स्ववज्रमेव क्षिप्तमित्येवं चिंताकुलहृदया आसन्निति भावः ॥ एतेन मल्लानामशनिरित्युल्लेखः ॥ ३९ ॥

**सभाजनं तदा स्वीयमानंदस्य स भाजनम् ॥ चक्रे चक्रधरश्चक्रं क्रव्यादानां प्रकंपयन् ॥ ४० ॥**

सभाजनमिति ॥ तदा प्रवेशकाले स चक्रधरः श्रीकृष्णः क्रव्यादानामसुराणां चक्रं समूहं प्रकंपयन् सन् स्वीयं स्वपक्षपातिनं सभाजनं सभासंबंधिनं लोकं आनंदस्य भाजनं पात्रं चक्रे ॥



सकलाऽसुरभयोत्पादनपूर्वकं सर्वान् स्वपक्ष्यानानंदयति स्मेति भावः ॥ स्वीयं सभाजनमानंदस्य भाजनं चक्रे इत्यनेन गोपानां स्वजनइति क्रव्यादचक्रं कंपयन्नित्यनेनाऽसतां शास्तेति स्वीयांतःपातित्वात्स्वपित्रोः शिशुरिति च उल्लेखा ज्ञेयाः ॥ ४० ॥

**हरकोदंडं भित्वा तत्तनुजाताऽऽननं स्मरश्च गजम् ॥ स्मृत्वा वैरं चिरतरमागतइति मेनिरे नार्यः ॥ ४१ ॥**

हरकोदंडमिति ॥ नार्यो मथुरासंबंधिन्यः स्त्रियः तमिति शेषः तं श्रीकृष्णं इति मेनिरे ॥ इति किं ॥ चिरतरं वैरं लक्षणया चिरकालभवं द्वेषं स्मृत्वा अर्थाद्धरस्येति योज्यं ॥ हरकोदंडं कंसेन पूजार्थं स्थापितं शिवधनुः च परं तत्तनुजाताऽऽननं तस्य शंकरस्य तनुजातः पुत्रो गजाननस्तस्याऽऽननमिवाऽऽननं मुखं यस्य तं तथाविधं गजं कुवलयाऽऽपीडं भित्वा आगतः स्मरः कामएवेति ॥ अत्र इति शब्देन कर्मणोभिहितत्वात्स्मरइति प्रथमा ॥ क्रमादमुं नारद इत्यबोधि स इतिवत् ॥ अनेन स्त्रीणां स्मरो मूर्तिमानित्युल्लेखो ज्ञेयः ॥ पथ्याऽऽर्या वृत्तं ॥ ४१ ॥

**ग्राहयितुं मत्प्राणानस्पृश्यान्वातभक्षकेण समम् ॥ मृत्युः किमागतोऽसाविति मेने तं सराममिह कंसः ॥ ४२ ॥**

ग्राहयितुमिति ॥ कंसः सरामं सबलभद्रं तं श्रीकृष्णं इति मेने ॥ इति किं ॥ असौ श्रीकृष्णः अस्पृश्यान्केनाऽपि स्प्रष्टुमनर्हान् अपवित्रत्वादित्यर्थः ॥ मत्प्राणान् मम प्राणवायून् ग्राहयितुं अर्थाद्भाताऽशनैरिति योज्यं ॥ वातभक्षकेण वातस्य वायोर्भक्षकेण

शषाऽवतारेण बलरामेण समं सह इहाऽऽगतो मृत्युः किमिति ॥ अनेन भोजपतेर्मृत्युरित्युल्लेखोबोत्ध्यः ॥ ४२ ॥

**ग० ॥ अथेत्थंकारमेकमप्यनेकधा सर्वैः परिकल्प्यमानं बहुमानं तं तूर्यादिवीरद्यवाद्यध्वनिभिर्द्विगुणगुणे ऽनंतचक्रवाले प्रवृद्धमदपूरश्चाणूरः ॥ ॥ २४ ॥ प० ॥ भोभो कृष्ण त्वमसि सबलो द्विप्रकारश्च तस्मात्सोदर्यस्ते निखिलजगतां धारको राजतुष्ट्यै ॥ मल्लक्रीडा विशदमनसा हर्षतो रंगभूमौ भाव्येत्याह प्रबलजलदध्वानवाचा स धीरः ॥ ४३ ॥**

अथ श्रीकृष्णं प्रति चाणूरस्योक्तिमाह ॥ अथेत्यादिगद्यसहितेन भोभोकृष्णेत्यादिश्लोकेन ॥ अथ प्रवेशानंतरं प्रवृद्धमदपूरः प्रवृद्धगर्वभरः धीरः धैर्यवान् स चाणूरनामा मल्लविशेषः एकमपि इत्थंकारं पूर्वोक्तप्रकारेण सर्वैर्मल्लादिभिर्बहुमानं बहुर्मानः सत्कारो यस्मिन्कर्मणि यथा तथा अनेकधा अनेकप्रकारेण परिकल्प्यमानं उल्लिख्यमानं ॥ अथवा बहुर्मानः सत्कारो यस्य तं तथाविधं इति श्रीकृष्णविशेषणं॥ यद्वा बहुर्मानश्चित्तसमुन्नतिः अन्याऽपेक्षया स्वोत्कर्षचिंतनप्रयुक्ताऽहंतेति यावत् सायस्मिन्कर्मणि यथा स्यात्तथा प्रवृद्धमदपूरः प्रवृद्धः मदस्य हर्षस्य कृष्णेन सह युद्धविषयस्य पूरो यस्यैवंविध इत्यन्वयः ॥ मानश्चित्तसमुन्नतिः ॥ हर्षेऽप्यामोदवन्मदइति चामरः ॥ तं श्रीकृष्णं प्रति ॥ प्र-





बलेति ॥ प्रबलो यो जलदो मेघस्तस्य ध्वानइव ध्वनिरिव ध्वानो यस्या एवंविधा या वाक् तया इति पूर्वोक्तप्रकारेणाह ॥ कस्मिन् सति ॥ तूर्यादीति ॥ तूर्यादीनि वीराणां द्यानि यानि वाद्यानि तेषां ध्वनिभिः अनंतचक्रवाले आकाशमंडले ॥ अनंतं सुरवर्त्म खं ॥ चक्रवालं तु मंडलमिति चामरः ॥ द्विगुणगुणे द्विगुणो द्वैगुण्यरूपाऽतिशयं प्राप्तो गुणः शब्दाख्यो यस्य तथाविधे सति॥ इति किं ॥ भोभो कृष्ण यस्मात्त्वं द्विप्रकारः सबलः शारीरबलसहितत्वबलरामसहितत्वरूपप्रकारद्वयवान् असि च परं ॥ ते सोदर्यो भ्राता बलदेवश्च निखिलजगतां धारकः अस्ति ॥ शेषावतारत्वात् ॥ एतेन हेतुद्वयेन मल्लक्रीडासमर्थत्वं बोधितं ॥ तस्माद्धेतोः राजतुष्ट्यै कंसप्रसादाय रंगभूमौ मल्लक्रीडास्थाने विशदमनसा भवतामस्माकं च राजकीयत्वेन परस्परं निर्मलेनांऽतःकरणेन हर्षतो हर्षेण मल्लक्रीडा भाव्या भावयितुं योग्या इति॥ अस्माभिरिति शेषः ॥ मंदाक्रांता वृत्तं ॥ २४ ॥ ४३ ॥

**ग० ॥ ततो मल्लोत्तमस्य पुरुषोत्तमः किल वचश्चातुर्यं विलोच्य समयोचितमचिरादेवं वचनं रचयामास ॥ २५ ॥**

ततइति ॥ स्पष्टं ॥ विलोच्य दृष्ट्वा ज्ञात्वेत्यर्थः ॥ लोचृदर्शने ॥ अननुभूतराजरीतेर्बालस्याऽपि अचिरात्समयोचितप्रत्युत्तरदानवर्णनेन कृष्णस्याऽपि परमचातुर्यं बोधितं ॥ २५ ॥

**प० ॥ मल्लेंद्र त्वं निखिलबलिनामग्रणी राजभृत्यः पीनोत्तुंगः सुदृढवपुषा भीषणो दुर्जयःक ॥ बाल**

**क्रीडानिरत इह यत्स्वल्पकः कानने वै क्वाऽहं तस्मा**
**त्प्रबलविबलाऽऽयोधनं स्यात्कथं नु ॥ ४४ ॥**

तदाह ॥ मल्लेंद्रेति ॥ पूर्वार्द्धयोजना स्फुटा ॥ यद्यस्मात् काननेवै अरण्ये एव ॥ वै निश्चये ॥ क्रीडानिरतः बालः अतएव स्वल्पकः अहं क्व ॥ तस्माद्धेतोः इह राजनिकटे प्रबलः प्रकृष्टबलवान् विबलो दुर्बलश्च तयोरायोधनं युद्धं कथं नु स्यात् ॥ अनुचितत्वादिति भावः ॥ युद्धमायोधनं जन्यमित्यमरः ॥ मंदाक्रांता वृत्तं ॥४४॥

**ग० ॥ अथेत्थं कथिते ऽप्यित्थंभूतां स्वेप्सितफलजनिकां प्रार्थनां मल्लवर्यस्याऽपरिहार्यमनोरथस्य पाथोजाऽन्ववायनाथस्तथेति स्वीकृत्य भुजाऽर्गलनिर्गलनिर्गलत्तलस्वनस्तनितेन तीव्रजवोद्भूतैः शौर्यवंशांकुरैरिव रोमांकुरैः कंटकितसमग्रविग्रहस्तं तादृक्षं परिगृह्य तदवयवैः स्वावयवानुद्ग्रथ्य रंगचक्रवाले मल्लक्रीडां चक्रे ॥ २६ ॥**

अथेति ॥ अथ ॥ पाथोजेति ॥ समुद्रोत्पन्नत्वात्पाथस उदकाज्जात उत्पन्नः पाथोजश्चंद्रस्तस्य योऽन्ववायो वंशस्तस्य नाथ ईश्वरः श्रीकृष्णः इत्थं पूर्वोक्तप्रकारेण कथिते सत्यपि ॥ अपरीति ॥ अपरिहार्यो निवारयितुमशक्यो मनोरथो मल्लयुद्धविषयकोऽभिलाषो यस्यैवंभूतस्य मल्लवर्यस्य चाणूरस्य इत्थंभूतां पूर्वोक्तां ॥ स्वेप्सितेति ॥ स्वस्येप्सितमिष्टं यत्फलं कंसहननादि तस्य जनिकां परंपरया संपादिकां ॥ इदं स्वीकारे हेतुगर्भं विशेषणं ॥ एवंविधां



प्रार्थनां ॥ तथेति यथा त्वं वदसि तथाऽस्त्विति स्वीकृत्यांऽगीकृत्य ॥ भुजार्गलेति ॥ भुजोर्गलमिवेति भुजार्गलं तस्मान्निरर्गलमनिरुद्धं यथा स्यात्तथा निर्गलन् निर्गच्छन् यस्तलस्वनो भुजमूलाऽऽस्फालनजन्यो ध्वनि स्सएव स्तनितं गर्जितं तेन हेतुभूतेन ॥ तीव्रेति ॥ तीव्रजवेनाऽतिवेगेन उद्भूतैरुत्पन्नैः ॥ शौर्येति ॥ शौर्यमेव वंशो वेणुस्तस्यांऽकुरैरिवेत्युत्प्रेक्षा रोमांकुरैरोमांचैः ॥ मेघगर्जनाऽवसरे सहसैव वंशांऽकुरा उद्भवंतीति लोके प्रसिद्धं ॥ कंटकितेति ॥ कंटकितः संजातकंटकः समग्रः संपूर्णो विग्रहो देहो यस्य स तथाविधः सन् तादृक्षं पूर्वोक्तविशेषणविशिष्टं तं चाणूरं परिगृह्य प्रथमतो भुजाभ्यां धृत्वा तदवयवैश्चाणूरावयवैः सह स्वाऽवयवान् उद्ग्रथ्य परस्परं संघटय्येत्यर्थः ॥ रंगचक्रवाले रंगमंडले मल्लक्रीडां चक्रे ॥ २६ ॥

**किंच ॥ प० ॥ उग्रोऽपि कामपालो यो बलोऽपि बल इत्यसौ ॥ मुष्टिकं मुष्टिकं कर्तुं प्राऽद्रवद्रंगभूतले ॥ ॥ ४५ ॥**

किंचेति ॥ उग्रइति ॥ उग्रोऽपि शिवोऽपि यः कामपालः कामं मदनं पालयतीति कामपालइति तथा अबलोऽपि बलरहितोऽपि यो बलः बलवान् इति ख्यात इति शेषः ॥ एवंविरोधाभासः ॥ परिहारस्तु उग्रः क्रूरः कामपालनामा ॥ कामपालो हलायुध इत्यमरः ॥ तथा ॥ अः वासुदेवो बलं यस्य सो ऽबलः यद्वा बवयोः सावर्ण्यात् न बलते युद्धादौ चलतीति अवलः युद्धादावचलइत्यर्थः ॥ बलो बलनामाचेति ॥ असौ बलरामः रंगभूतले मुष्टिकं प्रति एतदाख्यं

मल्लं प्रति प्राऽद्रवत् ॥ किं कर्तुं ॥ मुष्टिकं मुष्टौ कं मस्तकं यस्यैवं-विधं कर्तुं मुष्टिना तच्छिरो हर्तुमित्यर्थः ॥ यद्वा मुष्टिः के मस्तके यस्य तं ॥ तन्मस्तके मुष्टिप्रहारं कर्तुमित्यर्थः ॥ ४५ ॥

**ग० ॥ तत्र तावत्तल्लावण्यरसाऽभ्यासरसज्ञैः समग्रसभ्यैर्हृदयतद्गृहात्प्रेमचाराऽऽहूते तद्गुणगणभरतवरे दंतपटनेपथ्याऽवनद्धवदनरंगवलये रसनानर्तकीं नर्तयति सति तत्सामयिकतत्कामनीयकमणिशिखरिशिखरस्खलन्नाव्यकरुणामृतप्रवाहकूलंकषांऽतःकरणकासारप्रणालप्रसाराऽऽर्द्राऽऽर्द्रा मूर्तिमत्सौंदर्यमिव सोदर्यद्वयं सुंदर्यस्ताः परिभूयमानं संवीक्ष्य परस्परमेवं वाणीं विसर्जयामासुः ॥ ॥ २७ ॥**

अथ समयसभ्येषु भगवद्गुणान् गायत्सु तत्रत्यस्त्रियोऽपि युध्यंतौ रामकृष्णावालोक्य परस्परं वदंति स्मेत्येतदेव रूपकेण वर्णयति ॥ तत्रतावदिति ॥ तत्र रंगस्थाने तावत् युद्धवेलायां ताः सुंदर्यः स्त्रियः मूर्तिमत् सौंदर्यमिव सोदर्यद्वयं भ्रातृयुग्मं श्रीकृष्णबलरामरूपं परिभूयमानं अर्थाच्चाणूरमुष्टिकाभ्यामितियोज्यं ॥ संवीक्ष्य परस्परमन्योन्यं एवं वक्ष्यमाणप्रकारेणवाणीं विसर्जयामासुः ऊचुरित्यर्थः ॥ कस्मिन् सति ॥ तल्लावण्येति ॥ तस्य सोदर्यद्वयस्य यल्लावण्यं तदेव रसस्तस्य योऽभ्यासोऽभ्यसनं वारंवारं अभिलाषपूर्वकमवलोकनं तेन कृत्वा रसज्ञा रसज्ञातारो



रसिका इत्यर्थः ॥ तैस्तथाविधैः समयसभ्यैः ॥ हृदयेति ॥ हृदयमेव तद्गृहं तस्य गुणगणरूपस्य नटस्य गृहं सर्वदा चिंतनवशात् आवासस्तस्मात् ॥ प्रेमेति ॥ प्रेम स्नेहस्तदेव चारो दूतस्तेनाऽऽहूते आकारिते तस्य भगवतो गुणानां गणएव भरतवरो नाट्याऽऽचार्यस्तस्मिन् ॥ दंतेति ॥ दंतपटावेव ओष्ठावेव नेपथ्ये जवनिके ताभ्यामवनद्धं वेष्टितं वदनमर्थात् सभ्यानां तदेव रंगवलयं नृत्यस्थानं तस्मिन् रसनानर्तकीं रसना जिव्हैव नर्तकी तां नर्तयति-सति ॥ समयसभ्येषु भगवद्गुणगणान् गायत्सु सत्स्वित्यर्थः ॥ कीदृश्यः सुंदर्यः ॥ तत्सामयिकेति ॥ तत्सामयिकं युद्धसमयभवं यस्तयोः कामनीयकं रमणीयत्वं तदेव मणिशिखरी मणिपर्वतस्तस्य शिखरात् स्खलन्नाव्यो नौभिस्ताऽर्योऽ परिमित इति यावत् एवंविधो यः करुणाऽमृतप्रवाहस्तेन कूलंकषाः परिपूर्णा येंऽतःकरणान्येव कासाराः सरांसि तेषां यानि प्रणालानि जलनिर्गममार्गास्तेभ्यो यः प्रसारो जलप्रसरणं तेनाऽऽर्द्राऽऽर्द्रा अत्यंताऽऽर्द्राः॥ परमरमणीयसुकुमाराऽऽकृतिपीडनदर्शनेन अतिकरुणार्द्रहृदयाइत्यर्थः ॥ २७ ॥

**प० ॥ ब्रूयां संप्रति कं प्राति यं पतिमाहुर्गिरेस्तथाभूतैः ॥ मल्लैः सुमनोरूपं भ्रातृयुगं बाध्यते कष्टं॥४६॥**

तां वाणीमाह ॥ ब्रूयामिति ॥ जनाः यं गिरेः पर्वतस्य ॥ जात्यैकत्वादेकत्वं ॥ पतिं स्वामिनमाहुः ॥ पर्वतेंद्रमाहुरित्यर्थः ॥ तथाभूतैः पर्वतेंद्रसदृशैर्मल्लैः कर्तृभिः सुमनोरूपं सुमनसां पुष्पाणां रूरूपमिव रूपं यस्य तं ॥ पुष्पसदृशमतिसुकुमारमित्यर्थः ॥ यद्वा

सुमनोरूपं दिव्यरूपं ॥ यद्वा सर्वसभ्यानां शोभनेषु मनस्सु रूपं यस्य तत् ॥ साभिलाषं सर्वैर्मनसि धृतमिति भावः ॥ एवंविधं भ्रातृयुगं श्रीकृष्णबलरामरूपं बंधुयुग्मं बाध्यते पीड्यते कष्टमेतत् ॥ संप्रति कंप्रति ब्रूयां एकवचनं प्रत्येकाऽभिप्रायं ॥ ४६ ॥

**ग०॥ तदानीं करुणाऽर्णोनिधिवीचिविव्हलासु महिलास्वेवं वदंतीषु सतीषूभयरीत्याऽप्यपूर्वं कुतुकमवलोकयितुं प्रमिलिताया जनता याः कोलाहलेनतुंदिले दिङ्मंडले वर्ष्मविषक्तसरभससव्याऽसव्यभ्रमस्वेदसलिलक्लिन्नरजःपटलस्य स्वस्थता रजोनिवृत्तिमंतरा न भवतीति विमृश्येवक्रूरदीर्घनिःश्वासैस्तन्निवृत्तिं कुर्वंतं स्वगात्रपातपात्रतया चूर्णितसंपूर्णाऽवयवं मुष्टिकं मुसलधरइव गिरिधरोऽपि चाणूरं सुदूरं पातयांबभूव ॥ २८ ॥**

तदानीमिति ॥ तदानीं तस्मिन्नवसरे मुसलधरो बलरामो मुष्टिकमिव मुष्टिकाख्यं मल्लं यथा पातयामास तथेत्यर्थः ॥ गिरिधरोऽपि गिरेः श्रीगोवर्द्धनस्यधरोधारकोगोवर्धनधारी श्रीकृष्णोऽपि चाणूरं सुदूरं पातयांबभूव पातयतिस्म ॥ समकालमेवोभावुभौ पातयामासतुरित्यर्थः ॥ कस्मिन् सति ॥ करुणेति ॥ करुणा कारुण्यमेवाऽर्णोनिधिरपरिमितत्वात् समुद्रस्तस्य वीचीभिर्लहरीभिर्विव्हलासु व्याकुलासु महिलासु तत्र स्थितासु स्त्रीषु एवं पूर्वोक्तप्रकारेण वदंतीषु सतीषु ॥ तथा दि-



ङ्मंडले उभयरीत्या प्रकारद्वयेन अपूर्वं पूर्वमदृष्टं नवीनमिति यावत् ॥ अः वासुदेवः पूर्वो यस्य तथाविधं च कुतुकं अतिसुकुमारयो र्वज्रसदृशमल्लैः सह युद्धाऽवलोकनजन्यं कौतुकं अवलोकयितुं प्रमिलिताया जनताया जनसमूहस्य कोलाहलेन तुंदिले पूर्णे सतीत्यर्थः ॥ कीदृशं मुष्टिकं चाणूरंच ॥ क्रूरेति ॥ क्रूरा दीर्घा ये निःश्वासास्तैस्तन्निवृत्तिं तस्य शरीरलग्नस्य रजसो निवृत्तिं कुर्वंतं ॥ अत्रोत्प्रेक्षते ॥ वर्ष्मेति ॥ वर्ष्मणि शरीरे विषक्तं संलग्नं सरभसः सवेगो यः सव्याऽसव्यभ्रमो वामदक्षिणमंडलकरणं तेन यः श्रमस्तज्जन्यं यत्स्वेदसलिलं घर्मोदकं तेन क्लिन्नमार्द्रीभूतं रजःपटलं यस्य तथाविधस्य पुरुषस्य स्वस्थता स्वास्थ्यं रजोनिवृत्तिमंतरा अंगविषक्तरजोनिराकरणं विना न भवतीति विमृश्येव विचार्यैव ॥ अथच भगवद्धस्तेन हननप्रभावात्स्वस्थता स्वः मोक्षसुखे तिष्ठतीति स्वस्थस्तस्य भावस्तत्ता मोक्षसुखप्राप्तिः ॥ उक्तंच ॥ यन्न दुःखेन संभिन्नं नच ग्रस्तमनंतरं ॥ अभिलाषोपनीतं च तत्सुखं स्वः पदाऽऽस्पदमिति॥ सारजो निवृत्तिमंतरा उपलक्षणतया गुणत्रयनिवृत्तिमंतरा न भवतीति विचार्येवेति ॥ पुनः कीदृशं ॥ स्वेत्यादि ॥ अत्र स्वशब्देन बलः कृष्णश्च ॥ अत्र युद्धे ॥ स्वगात्रस्य स्वशरीरस्य यः पातः पतनजन्यसंयोगस्तस्य पात्रतया आश्रयतयेत्यर्थः ॥ चूर्णितेति ॥ चूर्णिताः संपूर्णा अवयवा यस्य तथाविधं ॥ श्रीकृष्णबलरामशरीरभारेण चूर्णिताऽवयवमित्यर्थः ॥ २८ ॥

**प०॥ अत्यजन्मुखबिलाद्दृशं तदा नेत्रतोऽस्रमसकृत्समल्लराट्॥ दर्शयन्निव सुरक्ततां निजां स्वामिनं**

**निजमयत्नसंभवाम्॥ ४७॥**

अत्यजदिति ॥ तदा पातनसमये स मल्लराट् चाणूरो मुष्टिकश्च मुखबिलात् नेत्रतः नयनद्वयाच्च भृशमतिशयितं अस्रं रुधिरं अश्रु-च असकृत् वारंवारं अत्यजत् त्यक्तवान्॥अत्र प्रयोजनमुत्प्रेक्षते॥ दर्शयन्निति॥निजं स्वकीयं स्वामिनं कंसं प्रति अयत्नसंभवां यत्न-संभवा न भवतीत्ययत्नसंभवा तां स्वाभाविकीमित्यर्थः ॥एवंविधां निजां स्वकीयां सुरक्ततां सुष्ठुरक्ततां रुधिरसहितत्वेन रक्तवर्णतां अथच सानुरागत्वं दर्शयन्निव ॥ स्वस्य रक्तवर्णत्वप्रदर्शनेनाऽयं त्वामपि मदवस्थं कर्ता स्वाऽनुरागप्रदर्शनेन त्वदर्थमेव मया प्रा-णविसर्गः कृत इति च ध्वनितं ॥ रथोद्धता वृत्तं ॥ रो नराविह र-थोद्धता लगाविति तल्लक्षणात् ॥ ४७॥

**ग० ॥ अतः परमसौ गुरुतरधराभरहरणबद्धप्रतिसरस्तदवसरे वृष्णिवरः कृष्णो निरंतरसहचरतया विरहभीरुकूटशलतोसलप्राणप्रकरं वरमल्लद्वयप्राणनिचयेन सह सघृणस्तूर्णं कृतांतनगरसरणिसंचारिणं चकार॥ २९॥**

अथ कूटशलादीनां हननमुत्प्रेक्षापूर्वकं वर्णयति ॥ अतइति ॥ अतः परं चाणूरमुष्टिकहननाऽनंतरं ॥ गुरुतरेति ॥ गुरुतरो यो ध-राभरः पृथ्वीभारः तस्य हरणविषये बद्धः प्रतिसरः कंकणं येन स तथाविधः पृथ्वीभारहरणे बद्धकंकणः ॥ भवेत् प्रतिसरो मंत्र-भेदे माल्ये च कंकणे इति मेदिनी ॥ वृष्णिवरो यादवश्रेष्ठोऽसौ





श्रीकृष्णः सघृणः सकरुणः सन्निव ॥ निरंतरेति ॥ निरंतरं चाणू-रमुष्टिकसहचरत्वेन ॥ विरहेति ॥ विरहविषये वियोगविषये भी-रुर्भयशीलो यः कूटशलतोसलानां उपलक्षणतया अन्येषामपि प्राणप्रकरः प्राणसमूहस्तं तदवसरे चाणूरमुष्टिकहननाऽनंतरसम-ये ॥ वरेति ॥ वरं श्रेष्ठं यन्मल्लद्वयं चाणूरमुष्टिकरूपं तस्य यः प्रा-णनिचयस्तेन सह तूर्णं शीघ्रं ॥ कृतांतेति ॥ कृतांतस्य यमस्य न-गरसंबंधिनी या सरणिर्मार्गस्तत्संचारिणं चकार कृतवान् ॥ २९॥

**तदानीं किल ॥ प० ॥ नीलांबरसंशोभं सकलकलं कृष्णमध्यमेतदलम्॥ रंगस्थलं तु मन्ये सुभसंयुक् चंद्रमंडलं रम्यं॥ ४८॥**

अथ रंगस्थलं चंद्रमंडलत्वेनोत्प्रेक्षते ॥ तदानीं किलेति ॥ उत्तरा-ऽन्वयि ॥ नीलेति ॥ तदानीं किल सकलमल्लहननाऽनंतरसमये ॥ अहमेतद्रंगस्थलं रम्यं चंद्रमंडलमेव मन्ये ॥ तुरवधारणे ॥ कीदृशं॥ नीलेति ॥ नीलांऽबरो रौहिणेयइत्यमरात् नीलांबरस्य बलरामस्य सम्यक् शोभा यस्मिंस्तत् ॥ नीलांऽबरेण सम्यक् शोभतइति वा॥ पक्षे नीलं नीलवर्णं यदंबरमाकाशं तत्र सम्यक् शोभा यस्य तत्॥ तत्र सम्यक् शोभते तदिति वा॥ तथा ॥ सकलकलं कलकलेन त-त्रत्यजनकोलाहलेन सहितं ॥ पक्षे सकलाः संपूर्णाः कला य-स्मिंस्तत् ॥ तथा ॥ अलमत्यर्थं कृष्णमध्यं कृष्णो मध्ये यस्य तत्॥ पक्षे कृष्णः कृष्णवर्णः कलंकरूपो मध्ये यस्य तत् सकलंकमित्य-र्थः ॥ तथा ॥ सुभसंयुक् सुष्ठु भा शोभा येषां ते कृष्णपक्षीयास्तैः संयुनक्ति तत् ॥ पक्षे सुष्ठु भानि नक्षत्राणि तैः संयुक् ॥ ४८ ॥

**ग०॥ ततो निजवृंदवृंदिष्ठप्राणप्रभंजनसंघजंघालतां स्वयमभ्यसितुमिव पलायमानेषु निखिलमल्लकिंपचेषु संप्रहारविच्छित्तिः कंसकृंतनात्पूर्वं मा भवत्विति विमृश्य वयस्यानाकृष्य ससंकर्षणे कृष्णे क्रीडति सति स औग्रसेनिः प्राक्तनद्वेषमन्विष्य विष्णुपदगुणस्पर्शः कर्णाऽवकाशे ऽनर्हइतीव तूर्यादिशब्दान्निवार्याऽनार्य इत्थंकारं वाक्यमकथयत्॥ ३० ॥**

ततइति ॥ ततः अखिलमुख्यमल्लहननाऽनंतरं अनार्यः स औग्रसेनिः उग्रसेनस्याऽपत्यमौग्रसेनिः कंसस्तूर्यादिशब्दान्निवार्य इत्थंकारं वक्ष्यमाणप्रकारेण वाक्यमकथयदुक्तवानित्यन्वयः ॥ अत्राऽनार्य इत्युक्तिरेतावत्पतापदर्शनेऽपि गोपसामान्यबुध्यनपायमूलेति बोध्यं ॥ तूर्यादिशब्दनिवारणे हेतुमुत्प्रेक्षते ॥ प्राक्तनेति ॥ प्राक्तनः प्राक्जन्मसंबंधी यो द्वेषस्तमन्विष्य मार्गयित्वा स्मृत्वेति यावत् ॥ कंसस्य जन्मांतराऽवच्छेदेन कालनेमित्वाद्भगवति द्वेष इति पौराणं वृत्तमनुसंधेयं ॥ विष्णुपदेति ॥ विष्णोर्भगवतः पदस्य चरणस्य ये गुणास्तेषां स्पर्शः अथच विष्णुपदस्याऽऽकाशस्य यो गुणः शब्दाख्यो वाद्यजन्यस्तस्य स्पर्शः कर्णाऽवकाशे ऽनर्हः अयोग्य इतीव इति विचार्यैवेत्यर्थः ॥ अत्राऽन्विष्येत्यस्य निवार्येत्यपेक्षया तस्य चाऽकथयदित्यपेक्षया पूर्वकालिकत्वं बोध्यं ॥ कस्मिन् सति ॥ ससंकर्षणे श्रीकृष्णे वयस्यानाकृष्य क्रीडति सति ॥ अर्थात्तैरिति योज्यं ॥ किं कृत्वेव ॥ निखिलेति ॥ किंपचा



दरिद्राः हीनबलत्वाद्भीतत्वाच्च निंद्या इति यावत् ॥ एवंविधा मल्ला मल्लकिंपचाः ॥ कुत्सितानि कुत्सनैरिति समासः ॥ निखिलाः संपूर्णा ये मल्लकिंपचास्तेषु ॥ निजेत्यादि ॥ अत्र निजशब्देन मल्लाः निजवृंदे वृंदिष्ठाः अतिशयेन वृंदारकाः श्रेष्ठाश्चाणूरमुष्टिकादयस्तेषां यः प्राणप्रभंजनसंघः प्राणवायुसमूहस्तस्य या जंघालताऽतिवेगवत्वं तां स्वयमप्यभ्यसितुमिव पलायमानेषु सत्सु॥चाणूरप्रभृतिप्रधानमल्लेषु हतेषु तदनंतरमवशिष्टेषु पलायमानेषु सत्स्वित्यर्थः ॥ कंसकृंतनात्कंसनाशनात्पूर्वं संप्रहारस्य युद्धस्य विच्छित्तिर्विच्छेदो मा भवत्विति विमृश्यैवेति लुप्तोत्प्रेक्षा ॥ निषेधार्थकोऽयं मा शब्दो नतु माङ् ॥ वृंदिष्ट इत्यत्र वृंदारकशब्दादिष्ठनि प्रियस्थिरेत्यादिना वृंदादेशः ॥ वृंदारकौ रूपिमुख्यावित्यमरः ॥ ३० ॥

**प०॥ भो भृत्याः संशृणुध्वं पशुपकुलकलंकायमानः किलाऽयं बालस्तस्याऽग्रजातो द्रुततरमधुना बध्यतां गोपवर्गः॥ तातं मत्प्रातिकूल्यप्रणयननिपुणं बंधुसंघं तदीयं हत्वा स्वस्थो भवामि प्रणयिभिरधुना मागधाद्यैर्बलिष्ठैः ॥ ४९ ॥**

तद्वाक्यमाह ॥ भोभृत्याइति ॥ भो भृत्याः हे अनुचराः यूयं शृणुध्वं ॥ श्रोतव्यमेवाह ॥ पशुपेत्यादि ॥ किलेति प्रसिद्धौ ॥ पशुपानां गोपानां कुले कलंकायमानो ऽयंबालः श्रीकृष्णः तथा तस्याऽग्रजो बलरामः तथा गोपानां नंदादीनां वर्गः समूहश्च अधुना द्रुततरं यावन्नपलाय्य गच्छेत्तावच्छीघ्रमेव बध्यतां ॥ रज्वादिभिर्बध्वा स्वाऽऽधीनीक्रियतामिति भावः ॥ तथा ॥ राज्यकाम-

नया मम प्रातिकूल्यप्रणयने विरोधाऽऽचरणे निपुणं तातमुग्रसेनं तथा तादृशमेव तदीयमुग्रसेनसंबंधिनं बंधुवर्गं वसुदेवादिसंबंधि- समुदायं च हत्वा मागधाद्यैर्मच्छ्वशुरजरासंधप्रभृतिभिर्बलिष्ठैः प्र- णयिभिः सुहृद्भिः सह अधुना अस्मिन्नेवकाले स्वस्थो भवामि ॥ अत्रस्वस्थो भवामीत्यनेन निष्कंटकत्वान्निश्चितो भवामीति कंस- स्याऽभिप्रायः ॥ परंतु स्वर्गस्थो भवामीत्यर्थांतरवती भाविसूचिकै- व वाक् तन्मुखतो निःसृता ॥ स्रग्धरा वृत्तं ॥ ४९ ॥

**ग० ॥ तत्क्षणमाशुशुक्षणिसदृक्षामक्षरपरंपरामा कर्ण्य स्वयं क्षमाधरोऽपि तद्वैपरीत्यमाश्रित्य कोपा ऽरुणनयनकमलः कंसाऽरातिमेवं कथयामास॥ ॥ ३१ ॥**

तत्क्षणमिति ॥ आशुशुक्षणिरग्निस्तेन सदृक्षां सदृशीं हृदयश्रवण- दाहिकामित्यर्थः ॥ अक्षरपरंपरां अर्थात्कंसस्य आकर्ण्य स्वयं क्षमाधरोऽपि क्षमायाः क्षांतिर्धरोऽपि अथच क्षमायाः पृथ्व्या ध- रो धर्ता शेषावतारत्वात् तत्क्षणं श्रवणसमकालं तद्वैपरीत्यं तस्य क्षमाधरत्वस्य वैपरीत्यं अक्षांतिमित्यर्थः ॥ आश्रित्य कोपारुणे- त्यादि स्फुटं ॥ कंसारातिं श्रीकृष्णं ॥ एतावदहतेऽपि कंसे हनन- स्याऽतिसंनिहितत्वात्कंसाऽरातिपदं ॥ ३१ ॥

**प० ॥ अ स्य त्वं वैरिणं कंसं तस्य हैतैषिणं कुलम्॥ यस्य वर्धनवेलायां पश्य हृष्यंति साधवः॥ ५० ॥**

तदाह ॥ अस्येति ॥ हे अ वासुदेव श्रीकृष्ण त्वं वैरिणं कंसं स्य नाशय ॥ षोंऽतकर्मणीत्यस्य लोण्मध्यमपुरुषस्य रूपं ॥ वैरिणं



कंसमित्यनेन साधुविद्वेषिण्यस्मिन्मातुलत्वप्रयुक्तः स्नेहो न कर्त्त- व्य इति सूचितं ॥ नैतावतैव संतोष्टव्यं किंत्वन्येऽप्येतत्पक्षपाति- नो हंतव्या इत्याह ॥ तस्येति ॥ तस्य कंसस्य हैतैषिणं हितैष्ये- व हैतैषिणं हितेच्छु ॥ स्वार्थिकः प्रज्ञाद्यण् इनण्यनपत्यइति प्रकृतिभावः ॥ कुलमसुरकुलं च स्य ॥ एतत्फलं साधुसंतोष- एवेत्याह ॥ यस्येति ॥यस्य कंसस्य तद्धितेच्छुकुलस्य च वर्धनवे- लायां वर्धनं छेदनइत्यमरात् वर्धनस्य च्छेदनस्य नाशस्येति या- वत् वेलायां समये साधवो हृष्यंति पश्य ॥ वाक्यार्थस्य कर्मत्वं ॥ हर्षस्य वा दर्शनक्रियायां कर्मत्वेनाऽन्वयः ॥ पश्य मृगो धावती- त्यत्र धावनवत् ॥ तान् पश्येत्यध्याहारो वा ॥ ५० ॥

**रोषेणोग्रप्रचलवपुषः कामपालस्य वाचं श्रुत्वा कृ ष्णो जलदनिनदां मंक्षु सूत्तुंगमंचम्॥ अध्यारुक्ष न्मिलितजनतामानसं रंगभूमेः क्रोधाऽऽक्रांतः प्र पदपतनात्कंपयन् भूमिदुष्टान्॥ ५१ ॥**

रोषेणेति ॥ कृष्णो रोषेण क्रोधेन कृत्वा ॥ उग्रेति ॥ उग्रं क्रूरं प्र- चलं चंचलं च वपुर्यस्यैवंविधस्य कामपालस्य बलरामस्य ज- लदनिनदां मेघध्वनिसदृशध्वनिमतीं वाचं श्रुत्वा क्रोधाऽऽक्रांतः सन् मंक्षु शीघ्रं रंगभूमेः सकाशात् सुतरां उत्तुंगं उच्चं कंसाधि- ष्ठितं मंचं तथा मिलिताया जनताया मानसं च अध्यारुक्षत् आ- रूढवान् ॥ किं कुर्वन् ॥ प्रपदपतनात् पादाग्रपाताद्धेतोः भूमिदु- ष्टान् भूमिश्च दुष्टाः कंसादयश्च तान् कंपयन् सन् ॥ मंदाक्रांता वृत्तं ॥ ५१ ॥

**ग० ॥ अथो धरानाथोऽसावभ्यमित्रीयमाधवप्रधावनवेगविस्त्वरप्रभंजनसाहाय्येनेव प्रबलीभवद्रोषोषर्बुधज्वालावलीढपुद्गलोंऽतर्निरवकाशतया सत्वरं त्वगावरणं संदह्य बहिर्निःसृतैस्तदंगारगणैरिवाऽऽभरणभरमणिनिकुरंबैर्देदीप्यमानसमग्रविग्रहोऽतिकरालभ्रूदंडकोदंडाल्कृतक्रूरेक्षणकांडप्रकांडप्रहारोऽतिप्रबलप्रचंडभुजदंडांऽचलयोर्धृताऽनर्घ्यचर्मरोचिष्णुरत्नप्रकररचितमुष्टिनिशितखड्गाऽभ्यामर्ददुर्धर्षो नितांतांऽतःकरणभीषणक्ष्वेडाध्वानबंधुरितसुधांधोऽध्वप्रदेशः कंसः स्वोत्तुंगमंचादुत्प्लुत्य कुटिमध्यदेशे नानामंडलाऽभ्यादानमभ्याचकार ततः क्रव्यादनिजचक्रे परिपश्यति वियच्चक्रवाले श्येनस्येवैनः कर्तुं चक्राऽऽकृति परिभ्रमतः॥३२॥ प०॥ जननांऽतराऽभिधानं सार्थयितुं रत्नशीर्षकं पूर्वं ॥ कंसस्य कालनेमेः पातयति स्माऽरिभृत्तदा शीघ्रं॥५२॥**

अथोइति॥अथो असौ धरानाथो राजा कंसः स्वोत्तुंगमंचात् स्वस्य उत्तुंग उच्चो यो मंचस्तस्मादुत्प्लुत्य कुटिमध्यदेशे सभास्थानमध्यभागे॥वासः कुटी द्वयोः शाला सभेत्यमरः॥नानामंडलाऽभ्यादानं नाना अनेकानि यानि मंडलानि मंडलाकारा गतिविशेषास्तेषा-



मभ्यादानमारंभं ॥ स्यादभ्यादानमुद्घात आरंभ इत्यमरः ॥ अभिश्रीकृष्णसमीपे आ समंताच्चकार ॥ कीदृशः कंसः अभ्यमित्रीयेति ॥ अमित्राभिमुखं गच्छतीत्यभ्यमित्रीयः शत्रुसंमुखगामी ॥ अभ्यमित्राच्छचेति च्छप्रत्ययः ॥ एवंविधो यो माधवः श्रीकृष्णस्तस्य यत्प्रकर्षेण धावनं तस्य यो वेगस्तस्माद्विस्त्वरः प्रसरणशीलः प्रभंजनो वायुस्तस्य साहाय्येनेवेत्युत्प्रेक्षा॥ प्रबलीभवदिति॥प्रबलीभवन् यो रोषः क्रोध एवोषर्बुधोऽग्निस्तस्य ज्वालाभिरवलीढं व्याप्तं पुद्गलं शरीरं यस्य स तथाविधः ॥ स्याद्वंधनपुरं पिंडो वपुः पुद्गलवर्ष्मणी ॥ कलेवरं शरीरे इति हैमः ॥ तथा ॥ अंतरित्यादि ॥ अंतः अभ्यंतरे निरवकाशतया अवकाशाऽभावेन हेतुना सत्वरं शीघ्रं त्वगावरणं त्वग्रूपमावरणमाच्छादनं संदह्य दग्ध्वा बहिर्निःसृतैः तदंगारगणैः तस्य क्रोधाग्नेरंगारगणैरिवेत्युत्प्रेक्षा ॥ आभरणेत्यादि विग्रहइत्यंतं स्फुटं ॥ तथा ॥ अतिकरालेत्यादि ॥ अति अत्यंतं करालः क्रूरो भ्रूदंड एव कोदंडो धनुस्तस्मात् ॥ कृतेति ॥ क्रूराणि यानीक्षणानि तान्येव कांडप्रकांडानि प्रशस्ता बाणास्तेषां ये प्रहारास्ते कृता येन स तथाविधः ॥ कांडोऽस्त्री दंडबाणाऽर्ववर्गाऽवसरवारिष्विति ॥ प्रकांडमुद्घतल्लजौ प्रशस्तवाचकान्यमूनीति चाऽमरः ॥ तथा ॥ अतिप्रबलेत्यादि ॥ अतिप्रबलौ प्रचंडौ यौ भुजदंडौ तयोरंचलयोः हस्तयोरित्यर्थः ॥ धृतेति ॥ धृतौ यौ अनर्घ्यममूल्यं चर्म खेटः रोचिष्णुभिर्दीप्यमानै रत्नप्रकरै रचितो मुष्टिः त्सरुर्यस्य तथाविधो निशितस्तीक्ष्णः खड्गश्च ताभ्यां साधनाभ्यां अभ्यामर्दे युद्धे दुर्द्धर्षो धर्षितुमशक्यः॥ अभ्यामर्दसमाघातसंग्रामाऽभ्यागमाहवा इत्यमरः ॥ तथा ॥ नि-

तांतेति ॥ नितांतमत्यंतमंतःकरणस्य भीषणा ये क्ष्वेडाख्या ध्वाना ध्वनयः सिंहनादास्तैर्बधुरितो व्याप्तः सुधांऽधसां देवानामध्वप्रदेशः आकाशरूपो येन तथाविधः॥ क्ष्वेडा तु सिंहनादः स्यादित्यमरः ॥ अथ प्रथमतः श्रीकृष्णकृतकंसमुकुटपातनं वर्णयति॥ तत इति गद्यशेषसहितेन जननांतरेतिश्लोकेन ॥ ततस्तदा परिभ्रमणसमये अरिभृत् अराः संत्यस्य तदरि चक्रं तद्बिभर्तीत्यरिभृत् श्रीकृष्णः ॥ क्रव्यादेति ॥ क्रव्यादा असुराः निजा निजपक्ष्या गोपादयः अक्रूरोद्धवप्रभृतयो वा तेषां चक्रे मंडले परितः पश्यति अवलोकयति सति वियच्चक्रवाले आकाशमंडले श्येनस्येवैनो हिंसादिरूपं पापं कर्तुं चक्राकृति चक्रसदृशं यथा तथा परिभ्रमतः कालनेमेरेतदवतारभूतस्य कंसस्य पूर्वं प्रथमं रत्नशीर्षकं मुकुटं पातयति स्म ॥ चक्राकृतिपरिभ्रमणे उत्प्रेक्षते ॥ जननांतरेत्यादि ॥ जननांऽतरे जन्मांऽतरे यदभिधानं कालनेमिरित्येतत् कालस्य कालचक्रस्य नेमिरित्येवंरूपेणाऽर्थेन सार्थयितुमनुगताऽर्थं कर्तुमिवेति लुप्तोत्प्रेक्षा ॥ चक्रधारायाश्चक्रपरिभ्रमणेन भ्रमणस्य प्रसिद्धत्वादित्यर्थः ॥ ३२ ॥ ५२ ॥

**ग०॥ तत्काले कालियदमनस्य करसंपर्कादिव रत्नकदंबाकलितकिरीटाच्छादने निवृत्ते शिरःपेटकात्संरंभनिर्गतविकरालक्रोधमणिधरेणेव दीर्घमेचककचचयेन दुष्प्रेक्षणीयस्य कंसस्य॥३३॥प०॥नंद्यावर्ते पौरशब्दैः प्रपुष्टे रुष्टः कृष्णः केशहस्तं स्व**





**हस्ते ॥ धृत्वा रंगे पातयित्वा द्रुतं तं विश्वाऽऽधारः संपपातोपरिष्टात्॥ ५३॥**

अथ रंगभूमौ कंसस्य पातनं तदुपरि श्रीकृष्णस्य संपतनं चाह ॥ तत्कालइति गद्यसहितेन नंद्यावर्तइत्यादिश्लोकेन ॥ तत्काले किरीटपातनसमये नंद्यावर्तः सर्वतोवर्तुलाकृती राजगृहभेदस्तस्मिन् पौरशब्दैः प्रपुष्टे पूर्णे सति रुष्टः कृष्णः कंसस्य केशहस्तं केशकलापं॥पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः॥स्वहस्ते धृत्वा रंगे रंगभूमौ तं कंसं पातयित्वा द्रुतं उपरिष्टात्पतितस्य तस्योपरि विश्वाधारः सन् संपपात ॥ विश्वस्य भारं गृहीत्वा तदुपरि सम्यक् पपातेत्यर्थः ॥ एतेन तद्देहचूर्णीकरणेन तत्प्राणहरणस्य सौलभ्यं सूचितं ॥ कीदृशस्य कंसस्य ॥ रत्नेत्यादि ॥ रत्नकदंबाऽऽकलितं यत्किरीटं तदेवाऽऽच्छादनं तस्मिन् कालियदमनस्य श्रीकृष्णस्य करसंपर्कादिव निवृत्ते सति शिरःपेटकात्सकाशात्॥संरंभेति॥संरंभेण वेगेन निर्गतः विकरालो भयंकरः क्रोधो यस्यैवंविधश्च यो मणिधरः सर्पस्तेनेवेत्युत्प्रेक्षा॥ दीर्घेति ॥ दीर्घो मेचकः कृष्णवर्णो यः कचचयः केशसमूहस्तेन दुष्प्रेक्षणीयस्य प्रेक्षितुमप्यशक्यस्य ॥ लोकेहि व्यालग्राहिणः करसंपर्केण सर्पपेटिकाच्छादने निवृत्ते सत्यंतःस्थितः सर्पः फणां विस्फार्य बहिर्निर्गच्छतीति प्रसिद्धं ॥ एतच्च कालियदमनस्येत्यनेन सूचितं ॥ श्लोके शालिनी वृत्तं ॥ ३३ ॥ ५३ ॥

**ग० ॥ ततः प्रभौ क्ष्माभृदिति प्रसिद्धोऽपि तद्रहितोऽयं जननांतरे तथा मा भवत्विति विचार्य त**

द्वत्वसमर्थनाय किल मुहुर्मुहुर्नामकर्म्मभ्यां स्वीकृतहरितया रिपुकरींद्रं क्षमातले परिकर्षति दृढनिवद्धकलत्रोऽत्र तनुत्रपिनद्धगात्रो निशिताश्रिकरालकरवालकलितकराग्रोऽत्युग्रो मज्ज्येष्ठसहजविग्रहे मन्नामवाच्यवयसां मत्पूर्वं पातो मा भूदितीव सीरायुधधृतपरिघपराभवेन शीघ्रं सातंकः कंकः पृथिव्यां निपपात ॥ ३४ ॥

ततइति ॥ कंसस्याऽधःपातनाऽनंतरं प्रभौ श्रीकृष्णे नामकर्मभ्यां नाम्ना संज्ञया कर्मणा हरणरूपक्रियया च स्वीकृतहरितया स्वीकृतांऽगीकृता या हरिता हरिरित्येवं नाम शत्रुहरणकर्तृत्वं च तया हेतुना श्लेषेण हर्यक्षः केसरी हरिरित्यमरात् सिंहत्वेन हेतुना रिपुकरींद्रं रिपुः कंस एव करींद्रो गजस्तं क्षमातले मुहुर्मुहुः परिकर्षति सति कंकः कंसभ्राता सातंकः स्वभ्रातृहननजन्यतापसहितः सन् ॥ रुक्तापशंकास्वातंक इत्यमरः ॥ मदिति ॥ मत्तो ज्येष्ठो यः सहजो भ्राता कंसस्तस्य विग्रहे देहे ॥ मन्नामेति ॥ मम यन्नाम कंक इति तद्वाच्यानि यानि वयांसि पक्षिणस्तेषां ॥ खगे यमे छद्मविप्रे कंक इति त्रिकांडशेषः ॥ खगबाल्यादिनोर्वयइत्यमरः ॥ पातः पतनं प्राप्तिरिति यावत् ॥ मत्पूर्वं मदपेक्षया पूर्वं प्रथमं ॥ मत्पतनात्पूर्वमित्यर्थः ॥ माभूदितीव इति विचार्येव ॥ सीरेति ॥ सीराऽऽयुधेन बलरामेण धृतो यः परिघ आयुधविशेषस्तेन यः पराभवस्तेन हेतुना अत्र रंगस्थले शीघ्रं पृथिव्यां निपपात ममारेत्यर्थः ॥ कीदृशः कंकः ॥ दृढेति ॥ दृढं निवद्धं कल-



त्रं कटिर्येनसः ॥ कलत्रं श्रोणिभार्ययोरित्यमरः ॥ तथा ॥ तनुत्रेति ॥ तनुत्रं वर्म दंशनमिमित्यमरात्कवचाच्छादितशरीरो धृतकवचइत्यर्थः ॥ तथा ॥ निशितेति ॥ निशिता तीक्ष्णा अश्रिर्धारा यस्यैवंविधो यः करालो भयानकः करवालः खड्गस्तेन कलितं युक्तं कराग्रं यस्य सः ॥ तथा ॥ अत्युग्रोऽतिक्रूरः यद्वा पराक्रमेण क्रौर्येण चोग्रं रुद्रमप्यतिक्रांतः रुद्राधिकक्रौर्यवानित्यर्थः ॥ कंसस्य भूमौ वारंवारं कर्षणे प्रयोजनमुत्प्रेक्षते ॥ क्षमाभृदिति ॥ क्षमाभृत् क्षमां पृथ्वीं बिभर्ति पालयतीति क्षमाभृत् राजा श्लेषेण क्षांतिधरः इति प्रसिद्धोऽपि तद्रहितः इदानीं क्षमारहितः अयं कंसो जननांतरे जन्मांतरे तथा क्षमारहितो मा भवत्विति विचार्य ॥ तद्वत्त्वेति ॥ तद्वत्त्वस्य क्षमावत्त्वस्य समर्थनाय किल ॥ क्षमायां कर्षणेन क्षमावत्त्वसंपादनाय किमित्यर्थः ॥ ३४ ॥

किंच ॥प०॥ अकुप्यत्सरुखड्गं तं दृष्ट्वाऽकुप्यत् स रुष्टदृक् ॥ न्यग्रोधाय ददे स्वास्थ्यं भ्रातृभिः सह सीरधृक् ॥ ५४ ॥

किंचेति ॥अकुप्येति॥ सीरधृक् सीरेण धृष्णाति प्रगल्भते इति सीरधृक् हलधरः स बलरामः॥ञिधृषा प्रागल्भ्ये इत्यस्मात् क्विपि रूपं अकुप्यत्सरुखड्गं कुप्यात्ताम्रादिकादन्यदकुप्यं हिरण्यं रजतं वा तन्निर्मितः त्सरुर्मुष्टिर्यस्यैवंविधः खड्गोयस्यतंतथाविधं ॥ स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताऽकृते ॥ ताभ्यां यदन्यत्तत्कुप्यमिति त्सरुः खड्गादिमुष्टौ स्यादितिचामरः॥ तं न्यग्रोधाख्यं कंसभ्रातरं दृष्ट्वा अकुप्यत् क्रुद्धोऽभूत् ॥ ततो रुष्टदृक् रुष्टे रोषयुक्ते दृशौ य-

स्यैवंविधः सन् न्यपोधाय भ्रातृभिरन्यैः कंसभ्रातृभिः सह स्वः स्वर्गे तिष्ठतीति स्वस्थस्तस्य भावः स्वास्थ्यं तद्ददे दत्तवान् ॥ अन्यभ्रातृसहितं तमपि मारयति स्मेत्यर्थः ॥ ५४ ॥

**कंसस्वर्भानुबाधारहितमथ तदा कृष्णचंद्रं प्रदृश्य तत्सोदर्याऽभ्रभंगाद्विमलतरमहो ते हि नीलांबरं च ॥ तारौघेणांऽचितं द्राग्विशदसुमनसः सौमसंघं समोदं देवा हर्षाऽश्रुधारां मुमुचुरमुमितः स्वर्गतस्तस्य भीतिं ॥ ५५ ॥**

कंसेति ॥ अथ कंसवधानंतरं ते प्रसिद्धाः विशदसुमनसः विशदं भयनिवृत्त्या निर्मलं सुष्ठु मनो येषां ते तथाविधा देवाः कृष्ण एव चंद्रस्तं ॥ कंसेति॥ कंसएव स्वर्भानू राहुः॥तमस्तु राहुः स्वर्भानुरित्यमरात् ॥ तस्य या बाधा तया रहितं प्रदृश्य च परं नीलांऽबरं-बलरामं ॥तदिति॥तस्य कंसस्य ये सोदर्याः कंकादयो भ्रातरस्तएवाऽभ्राणि मेघास्तेषां भंगान्नाशाद्विमलतरं निर्मलतरं निश्चितमित्यर्थः॥प्रदृश्य अथच कृष्णशब्देन वर्णः सच कलंकरूपस्तद्विशिष्टं चंद्रं राहुबाधारहितं तथा नीलवर्णमंबरमाकाशंतन्मेघभंगान्निर्मलतरं च प्रदृश्य तदा द्राक् इतोऽस्मात्स्वर्गतःस्वर्गात् अमुं कल्पवृक्षसंबंधिनं समोदं ससुगंधं सौमसंघं सुमानां पुष्पाणामयं सौमः स चाऽसौ संघश्च तं पुष्पसमूहं मुमुचुः ॥ तथा हर्षाऽश्रुधारां आनंदाऽश्रुपरंपरां च मुमुचुः॥ तथा तस्य कंसस्य संबंधिनीं भीतिं च मुमुचुः ॥ अहो आश्चर्ये ॥ हिः पादपूरणे ॥ कीदृशं कृष्णचंद्रं नीलांबरं च ॥ ताराणां शुद्धमौक्तिकानां ओघेन समूहेनांऽचितं ॥



पक्षे नक्षत्रवृंदेनांऽचितं ॥ स्रग्धरा वृत्तं ॥ ५५ ॥

**जयशब्दैर्ननु मनुजैस्तस्य गुणैस्तुंदिलं कृतं खं तत्॥ वयमपि कुर्म इतीव द्राग्वाद्यानि प्रचक्रुरुच्छब्दम् ॥ ५६ ॥**

जयशब्दैरिति ॥ नन्विति विस्मये ॥ यद्यस्मान्मनुजैः कर्तृभिः जयशब्दैः कृत्वा खं आकाशं तस्य आकाशस्य गुणैः शब्दरूपैस्तुंदिलं पुष्टं परिपूर्णमिति यावत् ॥ एवंविधं कृतं तत्तस्माद्वयमपि खं तद्गुणैः पूर्णं कुर्म इति विचार्यैव वाद्यानि भेर्यादीनि द्राक् शीघ्रं उच्छब्दं उत्कृष्टं उच्चतरं वा शब्दं प्रचक्रुः ॥ ५६ ॥

**अथ ॥ अंदुकाबंधनं पित्रोर्भेत्तुं बुद्धिं चकार सः ॥ संसारवागुरां पूर्वं मोचयित्वा रिपोः प्रभुः ॥ ५७ ॥**

अथेति ॥ अथ कंसादिहननाऽनंतरं ॥ अंदुकेति ॥ स प्रभुः श्रीकृष्णः पित्रोः वसुदेवदेवक्योः अंदुकाबंधनं अंदूरेवांऽदुका निगडस्तया बंधनं ॥ अंदूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य चेति मेदिनी ॥ केणइति ह्रस्वः ॥ यद्वा अंदुकेन आबंधनं ॥ अंदुको निगडोऽस्त्री स्यादित्यमरः ॥ तद्भेत्तुं बुद्धिं चकार ॥ किंकृत्वा ॥ पूर्वं प्रथमं रिपोः कंसस्य संसारवागुरां संसाराख्यां वागुरां मृगबंधिनीं मोचयित्वा ॥ एतेन पित्रोर्बंधमोचनस्य शत्रुबंधनाऽपेक्षयांऽतरंगत्वेऽपि तद्विपर्ययकरणात् शत्रुभावेनाऽनिशं मामेव चिंतयन् शत्रुरपि मया मोचितः किमुवक्तव्यमनन्यभावेन प्रेमपूर्वकं मामनुस्मरतः पुरुषान्मोचयामीतीति सूचितं ॥ ५७ ॥

**ग० ॥ तदनंतरमनेकेभ्योऽपि स्वाऽनुशये ऽजस्रमेक**

**तां निर्वहद्भ्यो ऽणककुणपाशनेभ्यः पंचताप्रदानेन तत्कुणपसमग्रपरिग्रहेक्षणेषु तत्क्षणमस्रार्द्रतां संविधाय स्वयमप्यभिमरपितृदर्शनाऽऽल्हादहेतुकां द्विविधां तामेवोद्वहन् स्वयं प्रेमश्टंखलापरिगृहीतः श्टंखलानिर्बद्धयोः पित्रोः कारागृहे ऽमंदमंदाक्षमंदाक्षः क्षिप्रमक्षिगोचरतां सबलः स समभजत ॥ ॥ ३५ ॥**

तदनंतरमिति ॥ तदनंतरं पितृमोचनबुद्धिकरणानंतरं स्वयं ॥ प्रेमेति ॥ प्रेमैव श्टंखला तया परिगृहीतः ॥ अमंदेति ॥ अमंदमनल्पं यन्मंदाक्षं एतावत्पर्यंतं पितृक्लेशोपेक्षाप्रयुक्ता लज्जा तेन मंदे पूर्णाऽवलोकनाऽपटुनी अक्षिणी लोचने यस्यैवंविधः ॥ मूढाऽल्पाऽपटुनिर्भाग्या मंदाः स्युरित्यमरः ॥ सबलो बलरामसहितः सः श्रीकृष्णः कारागृहे बंधनाऽऽलये श्टंखलानिर्बद्धयोः पित्रोरक्षिगोचरतां दृष्टिविषयत्वं क्षिप्रं समभजत प्राप्तवान् ॥ किं कुर्वन् ॥ अनेकेभ्योऽपि स्वानुशये अत्र स्वशब्देन कृष्णः स्वस्य यो ऽनुशयो दीर्घद्वेषस्तस्मिन्विषये ॥ अथाऽनुशयो दीर्घद्वेषाऽनुतापयोरित्यमरः ॥ अजस्रं निरंतरं एकतां एकत्वं निर्वहद्भ्यो धारयद्भ्य इति विरोधाऽऽभासः ॥ परिहारस्तु एकत्वं मुख्यत्वं ॥ एके मुख्याऽन्यकेवला इत्यमरः ॥ अणककुणपाशनेभ्यः अणकाः कुत्सिता ये कुणपाशना दैत्यास्तेभ्यः ॥ कुपूयकुत्सिताऽवद्यखेटगर्ह्याऽणकाः समा इत्यमरः ॥ पापाणके कुत्सितैरिति समासः ॥ पंचताप्रदानेन मरणप्रदानेन हेतुना ॥ स्यात्पंचता कालधर्म इत्यमरः॥एकत्वं धा-



रयद्भ्यः पंचताप्रदानेन चित्रमपि बोधितं ॥ तदिति ॥ तेषां दैत्यानां ये कुणपाः शवभूतानि शरीराणि समग्राणां परिग्रहाणां पत्नीनामीक्षणानि नयनानि च तेषु ॥ कुणपः शवमस्त्रियां ॥ पत्नीपरिजनाऽऽदानमूलशापाः परिग्रहा इति चाऽमरः ॥ तत्क्षणं तस्मिन्नेव क्षणे ॥अस्राऽऽर्द्रतां अस्रैरुधिरैरश्रुभिश्चाऽऽर्द्रतां॥तच्छरीरेषु रुधिराऽऽर्द्रतां तत्पत्नीनयनेषुबाष्पाऽऽर्द्रतां चेत्यर्थः ॥ संविधाय कृत्वा स्वयमपि॥अभिमरेति॥अभिमरो युद्धं॥भवेदभिमरो युद्धे इति मेदिनी॥पितृदर्शनप्रयुक्त आल्हादश्च तौ हेतू यस्यास्तां द्विविधां युद्धहेतुकरुधिरपितृदर्शनाल्हादप्रयुक्ताऽऽनंदाऽश्रुरूपप्रकारद्वयोपेतां तामेवाऽस्राऽऽर्द्रतामेव उद्वहन् धारयन् सन् ॥ अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते इति मेदिनीकोशात् ॥ ३५॥

**प०॥ प्राप्तं समाप्य कंसं कृष्णं मत्वा ऽतिभीतितस्तूर्णं॥ तत्पितरावुज्झित्वा दूरगतं समभवत्तदा दुःखम्॥ ५८॥**

प्राप्तमिति ॥ तदा कृष्णाऽऽगमनसमये दुःखं कर्तृ प्रकृतत्वाद्देवकीवसुदेवसंबंधि तत्पितरौ तस्य श्रीकृष्णस्य पितरौ देवकीवसुदेवौ उज्झित्वा त्यक्त्वा तूर्णं दूरगतं समभवत् ॥ कृष्णदर्शनसमयएव तयोरखिलं दुःखं शांतमभूदित्यर्थः ॥ अत्र हेतुमुत्प्रेक्षते ॥ कृष्णं कंसं समाप्य हत्वा प्राप्तं मत्वा विज्ञाय अतिभीतित इवेति गम्योत्प्रेक्षा ॥ स्वपितृक्लेशप्रदस्य कंसस्येव तत्प्रयुक्तस्य ममाऽपि हननमयं कुर्यादित्यत्यंतभयेनेवेत्यर्थः ॥ ५८ ॥

**दुःखंस्वसंभवं किल दूरस्थं वीक्ष्य श्टंखला शीघ्रम्॥**

तद्विप्रयोगभीत्या ससर्प हित्वा पदं तयोस्तु तदा ॥५९॥

निजेति ॥ तदा दुःखनिर्गमनाऽवसरे शृंखला तु निगडस्तु शीघ्रं तयोः पदं चरणं हित्वा ससर्प दूरं गतवती मुक्ताऽभूदित्यर्थः ॥ उत्प्रेक्षते ॥ स्वसंभवं अत्र स्वपदेन शृंखला ॥ दुःखं दूरस्थं वीक्ष्य तद्विप्रयोगभीत्या किल तद्वियोगभयेनेवेति ॥ ५९ ॥

ग० ॥ तदवसरेऽतिदुःखेंधनाऽनुसंधानजटालकरालतद्वियोगाऽनलसंतप्ताऽऽशयौ पितरौ देवकीवसुदेवौ शशिघनवपुषौ विनयादिगुणकूलंकषौ तनयौ बलकृष्णौ गाढं परिरभ्य तस्य खलस्य भयमिव बाष्पघनरसं मुंचंतौ तदंगसंगतिमिव शीततामाल्हादेन समं प्रापतुः॥ ३६॥

तदवसरेइति॥तदवसरे कृष्णाऽऽगमनाऽवसरे देवकीवसुदेवौ पितरौ कर्तृभूतौ बलकृष्णौ तनयौ कर्मभूतौ गाढं परिरभ्याऽऽलिंग्य खलस्य तस्य कंसस्य भयमिव कंसभयं यथा परित्यक्तवंतौ तथेत्यर्थः॥बाष्पघनरसं अश्रुजलं ॥ बाष्पमूष्माऽश्रु इति जलपर्यायेषु मेघपुष्पं घनरसइति चामरः ॥ मुंचंतौ संतौ तदंगसंगतिमिव ॥ आलिंगनेन पुत्रयोरंगसंगं यथा प्राप्तवंतौ तथेत्यर्थः ॥ आल्हादेन समं सह शीततां कंसकृतबंधनजन्यतापनिवृत्तिं प्रापतुः ॥ कीदृशौ पितरौ॥ अतीति ॥ अति अत्यंतं यानि दुःखानि तान्येवेंधनानि तेषाम





नुसंधानं मेलनमित्यर्थः ॥ तेन जटालो जटावान् प्रदीप्तइत्यर्थः ॥ अतएव करालः क्रूरो यस्तयोः पुत्रयोर्वियोग एवाऽनलोऽग्निस्तेन सम्यक् तप्तौ आशयावंतःकरणे ययोस्तौ ॥ कीदृशौतनयौ ॥ शशीति ॥ शशी चंद्रः घनो मेघस्तद्वद्वपुषी ययोस्तौ ॥ गौरनीलवर्णशरीरावित्यर्थः ॥ एतेन तयोः सहजतापनिवर्तकत्वं सूचितं ॥ चंद्रमेघयोश्च यथाक्रममाल्हादशैत्यहेतुत्वं सुप्रसिद्धं ॥ तथा॥ विनयादीति ॥ विनयादिगुणैः कूलंकषौ पूर्णावित्यर्थः ॥ ३६ ॥

ततोऽतिदुष्करकर्मकर्त्रे निजकन्याभर्त्रे दातुं तदवसरे कर्मानुरूपं पारितोषिकमलब्ध्वेव ह्रिया संकुंचितकरे तद्ग्रहणायेव सरागे पश्चिमरत्नाकरे भगवति वसुमति निमज्जति सति॥ ३७॥

अथ सूर्यास्तमयमुत्प्रेक्षापूर्वकं वर्णयति ॥ ततइति ॥ ततः कंसादिहननाद्यनंतरं ॥ अतीति ॥ अति अत्यंतं दुष्करं यत्कर्म कंसहननादिरूपं तस्य कर्त्रे ॥ निजेति ॥ निजकन्याया यमुनाया भर्त्रे श्रीकृष्णाय तदवसरे पारितोषिकदानाऽवसरे सरागे जामातृप्रेमवति वस्तुतो रक्तवर्णे तत्रापि वसुमति द्रव्यवति वस्तुतः किरणवति तत्राऽपि भगवति ऐश्वर्यादिषड्विधभगशालिन्यपि दातुं कर्मानुरूपं पारितोषिकमलब्ध्वेव ह्रिया संकुचितकरे संकुचितो जातसंकोचः करो यस्यैवंविधे सूर्ये तद्ग्रहणाय अन्यतः पारितोषिकपर्याप्तरत्नादिवसुसंपादनायेव पश्चिमरत्नाकरे निमज्जति सति ॥ अस्तमयवेलायां सूर्यस्य रक्तवर्णत्वं संकुचितकिरणत्वं चाऽनुभवसिद्धं ॥ दातरि द्रव्यव्ययवशाद्दातुं संकोचं कुर्वति सति

एतस्य हस्तः संकुचित इति लोका वदंति ॥ सतीतिसप्तम्या उत्तर-श्लोकेनाऽन्वयः ॥ ३७ ॥

**प० ॥ अतिनिद्रया गृहीतोऽरातिस्ते कंस इत्यमुं रात्रौ ॥ निद्राऽगात्तं सबलं कथयितुमिव कर्ण भाक्सुनेत्राऽब्जे ॥ ६० ॥**

अथ बलकृष्णयो रात्रौ निद्रासेवनमुत्प्रेक्षापूर्वकं वर्णयति ॥ अतीति ॥ रात्रौ निद्रा सबलं बलरामसहितं तं कंसहंतृत्वेन प्रसिद्धं अमुं श्रीकृष्णं प्रति इति पूर्वोक्तप्रकारेण कथयितुमिवेत्युत्प्रेक्षा ॥ कर्णेति ॥ कर्णौ भजतः ते तथाविधे सुनेत्रे एवाऽब्जे कमले कर्मभूते अर्थात् श्रीकृष्णस्य अगात् प्राप्तवती ॥ इति किं ॥ ते अरातिः कंसः अतिनिद्रया दीर्घनिद्रया मृत्युनेति यावत् गृहीत इति॥ कर्णभाक्सुनेत्राऽब्जे इत्यनेन निभृतमेतादृग्वृत्तकथने कर्णसान्निध्यं सूचितं ॥ रात्रेश्च निर्जनसमयत्वाद्गुप्तवृत्तांतकथनयोग्यकालत्वं स्फुटं ॥ सजातीयस्य वृत्तांतः सजातीयेनैव सम्यग्ज्ञायत इत्यतिनिद्रावृत्तांतकथनं निद्राकर्तृकमिहोत्प्रेक्षितं ॥ ६० ॥

**ग० ॥ ततः क्रमेणोग्रसेनस्य दुर्भाग्यतायामिव शर्वर्यां क्षीणतामुपगतायां सत्यां सेंदिरेव वदनाऽमृतसरोनयनेंदीवरसदना निद्रा यदुनंदनेन दत्तं पारितोषिकमादाय कंसातिनिद्रायै दातुमिव पक्ष्मकपाटमुद्घाट्य सत्वरं निःससार॥ ३८॥**

अथ प्रातर्जागृतिमुत्प्रेक्षापूर्वकं वर्णयति ॥ ततइतिगद्येन ॥ ततः पर्याप्तकालस्थित्यनंतरं इंदिरेव लक्ष्मीरिव ॥ लक्ष्मीर्यथा सरःसं-



बंधींदीवरवासिनी तथेत्यर्थः॥लक्ष्मीसादृश्यप्रतिपादनेन निद्राया अपि तद्वत्परमसुखदत्वादिकं बोधितं ॥ वदनेति॥वदनमेव श्रीकृष्णमुखमेवाऽमृतसरस्तत्संबंधिनयनमवेंदीवरं तत्सदनं निवासस्थानं यस्यास्तथाविधा ॥ अत्रेंदीवरशब्दः साधारणकमलवाची बोध्यः ॥ निद्राया नयनाऽधिकरणत्वं च लोकप्रसिद्धमेव ॥ सा निद्रा पक्ष्मकपाटं उद्घाट्य सत्वरं निःससार निर्गतवती ॥ कदेत्याकांक्षायामाह ॥ क्रमेणेति ॥ क्रमेण उग्रसेनस्य दुर्भाग्यतायामिव ॥ उग्रसेनस्य कंसपितुर्दौर्भाग्यं यथा क्रमेणक्षीणमभूत्तथेत्यर्थः ॥ शर्वर्यां रात्र्यां क्षीणतामुपगतायां प्राप्तायां सत्यां ॥ सूर्योदयवेलायां कृष्णो जागरितोऽभूदित्यर्थः ॥ पक्ष्मकपाटोद्घाटनपुरःसरं सत्वरं निद्राया गमने प्रयोजनमुत्प्रेक्षते ॥ यदुनंदनेनेत्यादि ॥ यदूनंदयति कंसवधेन संतोषयतीति यदुनंदनः श्रीकृष्णस्तेन दत्तं पारितोषिकं कंसहनने साहाय्यकरणप्रयुक्तसंतोषहेतुकं देयं आदाय गृहीत्वा कंसाऽतिनिद्रायै दातुमिव ॥ ३८ ॥

**प०॥ रागाद्ध्रुवं वसुमतीं वसुमत्यथ स्वैः सम्यक्करैः सुखकरैः परिरंभमाणे ॥ छाया तदा परिससर्प यतो ह्रिया सा दूरं रुषा तदतियुक्ततमं सपत्नी ॥ ६१ ॥**

अथ सूर्योदयं वर्णयति ॥ रागादिति ॥ अथ स्वयं वसुमति सूर्ये सुखकरैः स्वैः करैः किरणैः श्लेषेण हस्तैः वसुमतीं स्वानुरूपां पृथ्वीं रागात्स्नेहात् सम्यक् परिरंभमाणे आलिंगति सति ॥ उदयकालिकरक्तवर्णविशिष्टैः स्वैः करैः संपूर्णां पृथ्वीं व्याप्नुवति स-

तीत्यर्थः ॥ तदा व्यापनसमयएव छाया वृक्षादिसंबंधिनी श्लेषेण तत्पत्नी स्त्रीया स्वस्याऽननुरूपत्वप्रयुक्तया लज्जया रुषा च स्वसमक्षमन्याऽऽलिंगनप्रयुक्तरोषेण च दूरं अपससर्प गतवती ॥ ध्रुवमित्युत्प्रेक्षायां ॥ प्रातःकाले हि छाया दूरं गच्छतीति प्रसिद्धं ॥ तेजोवशादनातपोऽपि सूर्यतो दूरे तिष्ठतीतिच ॥ तत् दूरापसरणं यतः सा छाया वसुमत्याः सपत्नी अतोऽतियुक्ततमं अस्ति ॥ वसंततिलका वृत्तं ॥ ६१ ॥

**ग० ॥ तत्समये स तत्समयोचिताऽऽचरणमचिरमाचर्य भृशाऽऽल्हादचयपरिचितचित्तः सुरुचिररत्नाऽऽकल्पकौशेयादिविरचितद्विगुणशोभः शशिकुलेभः स्वाऽनुगगणैः परिवार्यमाणः सपरिवारः पौरजनैः सप्रेमाऽभिनंद्यमानो नंद्यावर्तमभिविश्योग्रसेनादिभिः सबहुमानमंचितः संचितंतद्भाग्योदयमिव ज्योतिर्विदामग्रगं गर्गं चारैः समाव्हाययामास ॥ ३९ ॥**

तत्समयइति ॥ शशिकुलेभश्चंद्रवंशश्रेष्ठः ॥ उत्तरपदभूत इभशब्दः श्रेष्ठपर्यायः ॥ स्युरुत्तरपदे त्वमी ॥ सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचका इत्यमरात् ॥ सः श्रीकृष्णः अचिरं शीघ्रं तत्समये प्रातःकाले तत्समयोचिताऽऽचरणं स्नानादिकं आचर्य कृत्वा नंद्यावर्तं एतन्नामकं राजगृहमभिविश्य प्रविश्य संचितं संगृहीतं तद्भाग्योदयमिव तस्य उग्रसेनस्य भाग्योदयमिवेत्युत्प्रेक्षा ॥ ज्योतिर्विदामग्रगं गर्गं चारैः समाव्हाययामास आकारितवान् ॥ की-



दृशः ॥ भृशेति ॥ भृशमत्यंतं य आल्हादचयस्तेन परिचितं चित्तं यस्य सः आनंदयुक्तइत्यर्थः ॥ तथा ॥ सुरुचिरेति ॥ सुतरां रुचिरा ये रत्नाऽऽकल्पा रत्नभूषणानि कौशेयादीनि च तैर्विरचिता द्विगुणा द्वैगुण्यरूपाऽतिशयवती शोभा येन स तथाविधः ॥ रत्नभूषणकौशेयादिभिरलंकृतइत्यर्थः ॥ तथा ॥ स्वानुगगणैर्गोपादिभिः परिवार्यमाणः ॥ तथा ॥ सपरिवारः दासादियुक्तः ॥ तथा ॥ पौरजनैः सप्रेम अभिनंद्यमानः ॥ तथा ॥ उग्रसेनादिभिः सबहुमानमंचितः सत्कृतः ॥ ३९ ॥

**प० ॥ कविता तत्र गुरुत्वं गुरुता तत्राऽस्ति साऽतिदुष्प्रापा ॥ तदपि सतद्द्वययुक्तो गर्गोऽगात्सर्वैर्वृष्णिभिर्वंद्यः ॥ ६२ ॥**

कवितेति ॥ यद्यपि यत्र कविता कवित्वं तत्र गुरुत्वमतिदुष्प्रापमिति लिंगव्यत्ययेनाऽन्वयः ॥ यत्र गुरुता तत्र सा कविता ऽतिदुष्प्रापा अस्ति ॥ कवितागुरुत्वयोः समानाधिकरण्यमतिदुर्लभमित्यर्थः ॥ बृहस्पतित्वशुक्रत्वयोः सामानाधिकरण्यमिवेति व्यंग्यं ॥ गुरू गीष्पतिपित्राद्यौ॥उशनाभार्गवःकविः ॥ संख्यावान्पंडितःकविरितिचामरः॥तदपि तथापि तद्द्वययुक्तः कवित्वगुरुत्वाभ्यां युक्तः॥ एतेन महामहिमत्वं सूचितं ॥ एवंविधः स गर्गः अगात् ॥ कीदृशो गर्गः ॥ सर्वैर्वृष्णिभिर्यादवैर्वंद्यः ॥ ६२ ॥

**दृष्ट्वा भास्वद्भासुरभूसुरमेतं सभासुराः शीघ्रं ॥ उत्तस्थू रवियोगाद्वररत्नात्तत्कराः सभांऽगणतः ॥ ६३ ॥**

दृष्ट्वेति ॥ सभासुराः सभायां सुराः तेजस्वित्वादिनादेवसदृशाः ॥ यद्वा भासुरैर्मण्यादिभिरलंकारैर्वा सहिताः सभासदः एतं समीपवर्तिनं ॥ भास्वदिति ॥ भास्वान् सूर्यस्तद्वद्भासुरस्तेजस्वी एवंविधो यो भूसुरो ब्राह्मणो गर्गस्तं दृष्ट्वा सभांगणतः सभांगणात् शीघ्रमुत्तस्थुः ॥ रवियोगात् सूर्यसंबंधात् वररत्नात् उत्तमाद्रत्नात् तत्करा इवेति लुप्तोपमा ॥ भासुरत्वेनोत्थितत्वेनच साधर्म्यं ॥ अथवा ॥ रवियोगात् सूर्यसंबंधात् हेतुभूतात् वररत्नात् सभासंबंधिश्रेष्ठरत्नेभ्यः ॥ जात्यैकत्वादेकत्वं ॥ तत्करास्तेषां वररत्नानां कराः किरणाश्च उत्तस्थुः ॥ एतेनसभाया रत्नमयत्वं बोधितं ॥ ६३ ॥

**ग० ॥ तदानीं यदुवरैः सविनयं विधिवत्कृतसभाजनः सभाजनं कृष्णेन सतृष्णं कृताऽभिषेकाऽध्येषणोऽतिधिषणो धिषणोपमः सुनिपुणं तत्क्षणमेवं स समाचचक्षे॥४०॥**

तदानीमिति ॥ सगर्गः तत्क्षणं श्रीकृष्ण प्रार्थनाक्षणे सुनिपुणं यथा स्यात्तथा सभाजनं सभास्थलोकं प्रति एवं वक्ष्यमाणप्रकारेण समाचचक्षे कथितवान् ॥ कीदृशः सः ॥ तदानीमागमनवेलायामेव यदुवरैः सविनयं यथा तथा विधिवद्यथाशास्त्रं कृतसभाजनः कृतसत्कारः ॥ तथा॥ कृष्णेन सतृष्णं साऽभिलाषं यथा तथा॥ कृतेति ॥ कृता अभिषेकविषये उग्रसेनराज्याऽभिषेकविषये अध्येषणा प्रार्थनापूर्वकं विनियोजनं यस्य सः ॥ सनिस्त्वध्येषणेत्यमरः ॥ अध्येषणा गुर्वादेः प्रार्थनया क्वचिदर्थे नियोजनमिति तद्व्याख्यातारः ॥ पुनः कीदृशः ॥ अति अतिशयिता धिषणा बुद्धिर्यस्य सः ॥ तथा ॥ धिषणो बृहस्पतिः स उपमा उपमानं यस्य स तथाविधः ॥ बुद्धिर्मनीषाधिषणा ॥ गीष्पतिर्धिषणो गुरुरिति चामरः ॥ ४० ॥



**प० ॥ गंधोदैः सिक्तमार्गं कुरुत पुरवरं चित्रवर्णैर्ध्वजानां चैलैस्तापाऽपनोदं विशदसुशिखरैः सौधवर्गस्य रम्यम् ॥ दध्यादर्शोदकुंभैः शुभफलजनकैस्तोरणैर्नव्यपर्णैर्द्वारप्रांतान् मनोज्ञान् वसनमणिगणैर्विग्रहान् पौरवर्गाः ॥६४॥**

तदाह ॥ गंधोदैरिति ॥ हे सभ्याः यूयमिति शेषः सौधवर्गस्य ॥ विशदेति ॥ विशदानि निर्मलानि यानि सुष्ठु शिखराणि तैः रम्यं पुरवरं गंधोदैः चंदनादिमिश्रैर्जलैः सिक्तमार्गं कुरुत ॥ अत्रोदकपर्याय उद शब्दः ॥ चित्रवर्णैर्ध्वजानां चैलैर्वस्त्रैस्तापापनोदं कुरुतेत्यत्रापि संबध्यते॥ एवमेवोत्तरत्र॥सर्वत्राऽऽरोपितध्वजवस्त्रच्छाययाऽऽतपबाधां निवारयतेति भावः ॥ शुभफलजनकैर्दध्यादर्शोदकुंभैः नव्यानि पर्णानि येष्वेवंविधैस्तोरणैश्च कृत्वा द्वारप्रांतान् मनोज्ञान् कुरुत ॥ मंगलेष्वेवंविध आचारो लोकप्रसिद्धः ॥ हे पौरवर्गाः यूयं वसनमणिगणैर्विग्रहान् देहान् ॥ मनोज्ञपदमत्रापि संबध्यते ॥ मनोज्ञान् रम्यान् कुरुत॥स्रग्धरा वृत्तं ॥ ६४ ॥

**ग० ॥ अथाऽनवस्करभास्करप्रभाभरतिरस्करणनिपुणः समग्रज्योतिर्विद्वर्गाऽग्रगण्यः स गर्गः स्वाज्ञप्तशुभंयुमुहूर्त्तप्रभावेण वसुंधरायामिव मधुपुर्यामपि मंगलगर्भायां सत्यां पौरप्रकरमुख**

प्रसृतजयशब्दप्रसरेण दिक्षु निखिलास्वंतर्वत्नीषु सतीषु हृद्यवाद्यसंपद्यमानाऽनवद्यध्वनिभिः सुपर्वसरण्यां गर्भिण्यां सत्यां शीतलिमसौरभभरगुरूदरतया मंदंमंदमनिलश्रेण्यामपि संचरंत्यां सत्यां यावद्वृजिनव्रजनिराकरणचणतीर्थसार्थसलिलमेलनाऽतिपवित्रखचितविविधरत्नकिरणधोरणीबंधुरकलधौतकलशनिभृतचतुरर्णवविमलवारिभिः साक्षान्मार्तंडमंडलाऽधिष्ठितं क्षात्रप्रभावमिव व्यासाऽत्रिच्यवनाऽसिताऽगिरोदेवलाऽऽर्ष्टिषेणनारदपिप्पलादप्रभृतिभिरद्धा तपस्सारैरिवैभिस्तपस्सारैः सहाऽतिविशदमणिवृंदस्थपुटितशातकौंभनिर्मितसिंहासनोपविष्टं तमुग्रसेनं सार्वभौमं परिपश्यति परिचारकसामंतचक्रे यथाविध्यभ्यषिंचत् ॥ ४१ ॥

अथेति ॥ अथाऽनंतरं स प्रसिद्धो गर्गः अद्धा साक्षात् तपस्सारैः तपसः सारैरिवेत्युत्प्रेक्षा ॥ तपःसारैस्तपएव सारो बलं येषां ते तपःसारास्तथाविधैराभिः प्रसिद्धैः ॥ व्यासेत्यादि ॥ व्यासादयः पिप्पलादांताः सर्वे ऋषयस्तत्प्रभृतिभिः सह ॥ यावदिति ॥ यावत् संपूर्णो यो वृजिनव्रजः पापसंघस्तस्य निराकरणेन वित्तः प्र-





ख्यातो यस्तीर्थसार्थस्तीर्थसंघस्तत्संबंधि यत्सलिलमुदकं तस्य मेलनेनाऽतिपवित्राणि यानि खचितानां विविधरत्नानां किरणधोरण्या किरणपरंपरया बंधुरा रम्या ये कलधौतकलशाः स्वर्णकुंभास्तेषु नितरां भृतानि धृतानि यानि चतुरर्णवसंबंधीनि विमलानि वारीणि जलानि तैः कृत्वा ॥ अतिविशदेति ॥ अतिविशदमतिनिर्मलं यन्मणिवृंदं मणिसमूहस्तेन स्थपुटितं व्याप्तं खचितमिति यावत् ॥ एवंविधं यच्छातकौंभेन सुवर्णेन निर्मितं च यत् सिंहासनं तस्मिन्नुपविष्टं स्थितं॥शातकुंभं शातकौंभमिति द्विरूपः॥ तं सार्वभौमं सर्वभूमेरीश्वरस्तत्रविदितो वा सार्वभौमः एवंविधं उग्रसेनं कंसस्य पितरं यथाविधि यथाशास्त्रं अभ्यषिंचत्॥सिंहासनोपविष्टोग्रसेनविषये उत्प्रेक्षते॥साक्षादिति॥मार्तंडमंडले सूर्यमंडले अधिष्ठितं स्थितं साक्षान्मूर्तिमत्तया प्रत्यक्षं क्षात्रप्रभावमिव ॥ एतेन सिंहासनस्य तेजोविशिष्टत्वं राज्ञोऽत्युत्कटप्रभावशालित्वं च बोध्यते ॥ कीदृशो गर्गः ॥ अनवस्करेति ॥ अनवस्करा निर्मला या भास्करस्य प्रभा तस्या भरोऽतिशयस्तस्य तिरस्करणे निपुणः॥ सूर्याऽधिकतेजःशालीत्यर्थः ॥ निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करमिति विशेष्यनिघ्नेष्वमरः ॥ तथा ॥ समग्रेति ॥ समग्राः संपूर्णा ये ज्योतिर्विदस्तेषां यो वर्गस्तस्मिन्नग्रगण्यः श्रेष्ठः ॥ कस्मिन्सति॥स्वाज्ञयेति॥स्वेन गर्गेण आज्ञप्तः शुभंयुः शुभान्वितो यो मुहूर्तस्तस्य प्रभावेण वसुंधरायामिव पृथिव्यामिव मधुपुर्यामपि मंगलगर्भायां सत्यां ॥ मंगलं गर्भेयस्यास्तस्यां॥पृथ्वीपक्षे मंगलो भौमो गर्भे यस्यास्तस्यां ॥ तथा ॥ निखिलासु दिक्षु ॥ पौरेति ॥ पुरजनसंघमुखनिःसृतजयघोषेण अंतर्वत्नीषु सगर्भासु परिपूर्णा-

स्थिति यावत् ॥ एवंविधासु सतीषु ॥ तथा ॥ सुपर्वणां देवानां या सरणिर्मार्गस्तस्यां ॥ आकाशे इत्यर्थः ॥ हृद्येति ॥ हृद्यैर्मनोहरै-र्वाद्यैः संपद्यमानाः अनवद्याः अर्थात्सुश्रवा ये ध्वनयस्तैर्गर्भिण्यां परिपूर्णायामिति यावत् ॥ एवंविधायां सत्यां ॥ तथा ॥ अनिल-श्रेण्यां वायुपरंपरायां॥ शीतलिमेति॥शीतलिमा शैत्यं सौरभं सौ-गंध्यं तयोर्यो भरो भारस्तेन कृत्वा या गुरूदरता सगर्भत्वं परिपू-र्णत्वमितियावत् ॥ तया कृत्वा मंदंमंदं संचरंत्यां सत्यां ॥ मंदे शी-तले सुगंधवति वायौ प्रसरति सतीत्यर्थः॥ लोके गर्भिणीनां गर्भ-भाराऽलसतया मंदगमनं प्रसिद्धं ॥ अपिः समुच्चये ॥ तथा ॥ प-रिचारकेति ॥ परिचारकाः सेवका ये सामंताः मांडलिका रा-जानस्तेषां चक्रे समूहे परितः सर्वतःपश्यति सति॥एतेन सार्वभौ-मत्वं तस्य दृढीकृतं ॥ ४१ ॥

प० ॥ मुनिवर्यानथ नत्वा रत्नकिरीटादिकं नृपो
धृत्वा ॥ विधिवत्सर्वं कृत्वा हर्षयुतोऽभूद्गजादिकं
दत्वा ॥ ६५ ॥

मुनिवर्यानिति ॥ अथ अभिषेकाऽनंतरं ॥ शेषं सुगमं ॥ अत्र रत्न-किरीटादिधारणं गजादिदानं च अभिषेकांऽगतया ज्ञेयं ॥ ६५ ॥

तदानीं॥प०॥ स्निग्धसरागसुपौरेक्षणसंपर्कात्सरा
गइव तत्र ॥ घुसृणाऽगुरुपंकांऽगो वरासनस्थो
रराज राजवरः॥ ६६ ॥

तदानीमिति ॥ अभिषेकाऽनंतरसमये ॥ स्निग्धेति ॥ तत्र सभा-यां वरासनस्थो राजवरो राजश्रेष्ठ उग्रसेनः ॥ घुसृणेति ॥ घुसृणं



काश्मीरजन्म तेन मिश्रितो योऽगुरुपंकः सः अंगे यस्यैवंभूतः ॥ अगुरुकुंकुमपंकांऽगरागलिप्तांऽग इत्यर्थः ॥ अतएव सरागः रागो-ऽनुरागो लौहित्यं च तत्सहितो रराज शुशुभे ॥ सरागत्वे हेतुमुत्प्रे-क्षते ॥ स्निग्धेति ॥ स्निग्धानि क्रौर्यरहितानि अथच अरूक्षाणि सरागाणि सप्रेमाणि अथच रक्तिमविशिष्टानि सुपौराणामीक्ष-णानि नयनानि तेषां संपर्कादिव ॥ स्निग्धत्वरक्तत्वविशिष्टांऽग-रागयुक्तो राजा स्निग्धसरागपौरजननयनसंसर्गादिव तथाविधो भातीत्यर्थः ॥ ६६ ॥

ग० ॥ तदानीमस्य विधृतभूषणाऽनर्घ्यविविधरत्नाऽविरलतरलप्रभाविमलसलिलमध्यवर्तिवदनकमलं संसेवितुमागताभ्यां हंसाभ्यामिव चामराभ्यां परिचितप्रांतभागस्याऽस्मत्कुलतिलकोऽयं कृतराज्यतिलकोऽभूदित्यानंदांऽदितेनोडुनिचयपरिश्रितेन भगवता चंद्रेणेव मुक्तादामाऽवलंबितधवलाऽऽतपत्रेण कृतच्छायस्य नानादेशनरेशनिदेशाऽऽगताऽनेकोपायननिचयव्याप्ताऽग्रभूभागस्य वाणिनीजनसुसंगीतिनिपुणश्रवणजातशर्माऽतिरेकाऽर्द्धमुकुलितनयननलिनस्य मणिप्रचुरचामीकरमुष्टिकृपाणकलितकरांचलस्य मंदस्मितच्छलेन हृद्देशादुत्कूलितस्य भगवद्यशसः प्रसारमिव कुर्वतः कांतस्य मेदिनीकांतस्य पुरः

**प्रदेशे नव्याऽनेकबिरुदकाव्यमुखरमुखा बहुपा
रितोषिकलिप्सवः सूतबंदिमागधाः सहर्षमेवं सं
जगदुः ॥ ४२ ॥**

अथाऽभिषेकाऽनंतरं सिंहासनाऽधिष्ठितस्य राज्ञश्छत्रचामरादि-
राजचिन्हविशिष्टस्य सूतमागधादिभिः कृतां स्तुतिं वर्णयितुमुप-
क्रमते ॥ तदानीमिति ॥ अस्य गर्गेणाऽभिषिक्तस्य सिंहाऽऽसनाऽ-
धिष्ठितस्य कांतस्य मनोरमस्य मेदिनीकांतस्य भूपतेरुग्रसेनस्य
पुरःप्रदेशे अग्रभागे तदानीं ॥ नव्येति ॥ नव्यानि नूतनरचितानि
अनेकबिरुदघटितानि यानि काव्यानि तैर्मुखराणि वाचालानि
मुखानि येषां ते तथाविधाः ॥ बहुपारितोषिकलिप्सवः सूतबंदि
मागधाः सहर्षं एवं वक्ष्यमाणं संजगदुः ॥ कीदृशस्य मेदिनी-
कांतस्य ॥ विधृतेत्यादि ॥ विधृतानि यानि भूषणानि तत्संबंधी-
न्यनर्घ्याण्यमूल्यानि यानि विविधान्यनेकजातीयानि रत्नानि ते-
षामविरला घना तरला तारल्यविशिष्टा या प्रभा सैव विमलं
निर्मलं सलिलं तस्य मध्ये वर्तते तत्तथाविधं यद्वदनमेव कमल-
मर्थाद्राज्ञस्तत्कर्मभूतं सम्यक् सेवितुं आगताभ्यां हंसाभ्यामिवे-
त्युत्प्रेक्षा ॥ चामराभ्यां परिचितः सेवितः प्रांतभागो यस्य तथा-
विधस्य ॥ धृतमणिगणाऽभरणस्य सुवदनस्योभयोः पार्श्वयोरुद्धू-
तचामरस्येत्यर्थः ॥ तथा ॥ अस्मदित्यादि ॥ अस्माकं यत्कुलं त-
स्य तिलकइव अलंकारभूतइत्यर्थः ॥ एवंविधो ऽयं राजा उग्र-
सेनः कृतो राज्यसूचकस्तिलको यस्यैवंविधोऽभूदिति हेतोर्य आ-
नंदस्तेन अंदितेन बद्धेन युक्तेनेति यावत् तथा उडुनिचयेन न-



क्षत्रगणेन परितः श्रितेन ॥ नक्षत्रगणाऽभिप्रायेण बहुत्वविवक्ष-
णादस्मत्कुलेत्यत्र मादेशाऽभावः ॥ भगवता ऐश्वर्यवता चंद्रेणे-
वेत्युत्प्रेक्षा॥मुक्तादाम्ना मौक्तिकमालया अवलंबितं यद्धवलाऽऽत-
पत्रं तेन कृतच्छायस्य॥कुलकूटस्थस्य स्ववंश्येषु च्छायाकरणं लो
कोक्तिप्रसिद्धं॥तथा॥नानादेशेति॥नानादेशसबंधिनो ये नरेशा रा-
जानस्तेषां निदेशात्समीपादागतानि यान्यनेकान्युपायनानि उप-
दास्तेषां निचयेन समूहेन व्याप्तोऽग्रभूभागो यस्य तस्य ॥ निदेशः
स्यादुपकंठे शासने परिभाषणे इति हैमः ॥ तथा ॥ वाणिनीति ॥
वाणिनीजनानां नर्तकीजनानां सुष्ठु उत्तमा या संगीतिर्गानं त-
स्या निपुणं यच्छ्रवणं तेन संजातो यः शर्माऽतिरेकः सुखातिश-
यस्तेनाऽर्धमुकुलिते नयननलिने यस्यैवंविधस्य ॥ वाणिन्यौ न-
र्तकीदूत्यावित्यमरः ॥ तथा ॥ मणीति ॥ मणिभिः प्रचुरश्चामीकर-
निर्मितः स्वर्णनिर्मितो मुष्टिर्यस्यैवंविधो यः कृपाणः खड्गस्तेन
कलितः करांऽचलो यस्यैवंविधस्य ॥ तथा ॥ मंदेति ॥ मंदहास-
मिषेण त्वद्देशादुत्कूलितस्य परिपूरणाऽवशिष्टतया बहिरुच्छलि-
तस्य भगवद्यशसः प्रसारं विस्तारं कुर्वतइव स्थितस्य ॥ ४२ ॥

**प०॥ सुकवेः काव्यमिवते पस्त्यमस्त्वनिशं नृप॥
सुवर्णाऽलंकृतिरसैर्हृद्यं परिकराऽन्वितं॥६७॥**

तदाह ॥ सुकवेरिति ॥ हे नृपते पस्त्यं गृहं ॥ निशांतपस्त्यसदनभव-
नाऽगारमंदिरमित्यमरः ॥ अनिशं निरंतरं सुकवेः काव्यमिवाऽ-
स्तु ॥ कीदृशं पस्त्यं काव्यं च ॥ सुवर्णेति॥सुवर्णं स्वर्णं अलंकृतयो
नानाविधरत्नघटिता अलंकाराः रसा दुग्धादयः यद्वा रसविशि-
ष्टाः पदार्थाश्च तैर्हृद्यं मनोरमं ॥ पक्षे शोभना मृदुत्वादिगुणवि-

शिष्टा वर्णा अक्षराणि अलंकृतय उपमादयः रसाः शृंगाराद्यश्च तैर्हृद्यं ॥ तथा ॥ परिकराम्वितं परिकरेण परिवारेणाऽन्वितं युक्तं यद्वा परिकरः पर्यंकः उपलक्षणतया सर्वभोगसाधनानि तैर्युक्तं ॥ परिकरः पर्यंकपरिवारयोरित्यमरः॥पक्षे परिकरेण परिकराऽऽख्यालंकारेणाऽन्वितं ॥ अलंकारः परिकरः साऽभिप्राये विशेषणे इति तल्लक्षणाऽनुरोधेन साऽभिप्रायविशेषणसत्वे तत्सत्वादुपलक्षणविधया व्यंग्येनान्वितं ॥ तेनचोत्तमत्वं बोधितं ॥ एतदर्थमेवाऽलंकृतिपदेनैव संग्रहे ऽस्य पृथगुपादानं ॥ ६७ ॥

**सुप्रतिपत्संवृद्धे शुचिहस्ते त्वयि सुभाऽन्विते युक्ता॥
कृष्णां तःकरणे ऽये ऽनंताऽभिख्ये ऽस्ति राजता रा
जन्॥ ६८॥**

सुप्रतीति ॥ अये राजन् त्वयि राजता भूपतित्वं श्लेषेण चंद्रत्वंच युक्ता अस्ति ॥ योग्यत्वप्रतिपादकानि साधारणानि विशेषणान्याह ॥ स्विति ॥ प्रतिपद्ज्ञप्तिचेतनाइत्यमरात् सुष्ठु या प्रतिपत् ज्ञानं तया संवृद्धे ज्ञानसंवृद्धियुक्ते इत्यर्थः ॥ पक्षे शोभना शुक्लपक्षीया या प्रतिपत् तस्यां संवृद्धे ॥ प्रतिपदमारभ्यैवैकैकस्याः कलाया वर्द्धमानत्वात् ॥ तथा ॥ शुचीति ॥ शुचिः शुद्धो हस्तो यस्य तस्मिन् ॥ निरंतरं दानोदकक्षालितत्वात् भगवत्सेवातत्परत्वाच्च ॥ पक्षे शुचयः शुभ्राः हस्ताः साध्यवसानलक्षणया कराः किरणा यस्य तस्मिन् ॥ तथा ॥ सुष्ठु उत्तमा या भा कांतिस्तयाऽन्विते ॥ यद्वा सुष्ठु भा येषां ते सुभाः सामंतास्तैरन्विते ॥ पक्षे सुष्ठु भानि नक्षत्राणि तैरन्विते ॥ तथा ॥ कृष्णांतःकरणे कृष्णे अंतःकरणं



यस्य तथाविधे ॥ यद्वा कृष्णएवांऽतःकरणं यस्यैवंविधे ॥ भगवदेकतानत्वेन कीटभृंगन्यायेन कृष्णरूपत्वसंभवात् ॥ पक्षे कृष्णं मलिनं सकलंकमितियावत् ॥ एवंविधमंतःकरणं यस्य तथाविधे ॥ अत्रांऽतःकरणशब्देन मध्यभागो ग्राह्यः ॥ तथा ॥ अनंताऽभिख्ये अनंता अपरिमिता अभिख्या शोभा यस्य तस्मिन्नित्युभयसाधारणं ॥ यद्वा अनंतो भगवानेव अभिख्या शोभा कारणं यस्य तस्मिन् ॥ अनंतायां पृथ्व्यां अभिख्या यस्य तस्मिन्निति वा राजपक्षे ॥ चंद्रपक्षे अनंते आकाशे अभिख्या यस्य तथाविधे ॥ अभिख्या नामशोभयोरित्यमरः ॥ ६८ ॥

**भूत्याऽहीनगणैः संसेव्ये भूभृत्समाश्रिते नृपते ॥
एकस्मिन् हरिहरता त्वयि दृष्टा वाहिनीपदे वं
द्ये ॥ ६९ ॥**

भूत्येति ॥ हेनृपते एकस्मिन्नपि त्वयि हरिहरता हरिहरयोर्भावो हरिहरता ॥ भावप्रत्ययस्य प्रत्येकं संबंधात् हरित्वं हरत्वं चेत्यर्थः॥ दृष्टा मयेतिशेषः॥ एतदेवोभयसाधारणैर्विशेषणैर्द्रढयति ॥ भूत्येति ॥ भूत्या संपत्त्या अहीनानामुत्तमपुरुषाणां गणैश्च संसेव्ये ॥ हरिपक्षे भूत्या लक्ष्म्या अहीनानामुत्तमानां सनकादीनां भक्तानां गणैः संसेव्ये ॥ हरपक्षे भूत्या भस्मना अहीनां सर्पाणामिनाः स्वामिनो वासुक्यादयस्तेषां गणैः संसेव्ये ॥ भूतिर्भस्मनि संपदीत्यमरः ॥ तथा ॥ भूभृद्भिर्मांडलिकैः सम्यगाश्रिते ॥ हरिपक्षे भूभृन्मंदराद्रिः कूर्माऽवतारे गोवर्धनोवा कृष्णाऽवतारे सम्यक् आश्रितो येन तस्मिन् ॥ हरपक्षे भूभृत्कैलासः स आश्रितो निवासार्थं

येन तथाविधे ॥ आहिताग्न्यादित्वान्निष्ठांतस्य परनिपातः॥तथा॥ वाहिनीपदे वाहिनी सेना पदे स्थाने राजधान्यामिति यावत् यस्य तथाविधे ॥ हरिपक्षे वाहिनी गंगा पदे चरणे यस्य तस्मिन् ॥ हरपक्षे वाहिन्या गंगायाः शिरोऽवच्छेदेन स्थानं तस्मिन् ॥ वाहिनी स्यात्तरंगिण्यां सेनासैन्यप्रभेदयोरितिमेदिनी ॥ पदं व्यवसितत्राणस्थानलक्ष्मांऽघ्रिवस्तुष्वित्यमरः ॥ तथा ॥ वंद्ये ॥ सर्वत्रसमं ॥ ६९ ॥

**दृग्युग्मे भूरिबले मध्ये वर्गे जलाऽऽलये रागे ॥**
**गजशिरसि च प्रदाने राशिचयस्ते प्रदृश्यते क्ष्मेश ॥ ७० ॥**

दृग्युग्मेइति ॥ हेक्ष्मेश पृथ्वीपते ते तव त्वत्संबंधिष्वेतेषु राशिचयः राशीनां मीनादीनां चयः संघः किंचिदूनः प्रदृश्यते ॥ एतेषु केषु ॥ दृग्युग्मे नयनयुगे मीनो मत्स्यः ॥ तयोः परस्परं सादृश्यात् अथच मीनाख्यो राशिभेदः दृग्युग्मस्य दकारादित्वात् ॥ तथा ॥ भूरिबले बहुसैन्ये धनुः कार्मुकं ॥ अथच धनुराख्यो राशिः भूरिबलस्य भकारादित्वात् ॥ तथा ॥ मध्ये वलग्ने सिंहः मध्यस्य सिंहमध्यसदृशत्वेन तथा प्रत्यभिज्ञानात् ॥ अथच सिंहाख्यो राशिः मध्यस्य मकारादित्वात् ॥ तथा ॥ वर्गे सजातीयस्वीयसंघे वृषो धर्मः ॥ अथच वृषाख्यो राशिः वर्गस्य वकारादित्वात् ॥ तथा ॥ जलाऽऽलये स्वसत्ताऽऽक्रांते समुद्रे मकरः भाषायां मगरइति प्रसिद्धः ॥ अथच मकराख्यो राशिः जलाऽऽलयस्य जकारादि-





त्वात् ॥ रागे प्रीतौ तुला पुत्रादिस्वीयपरकीयसाधारण्येन साम्यं ॥ अथच तुलाख्यो राशिः रागस्य रकारादित्वात् ॥ तथा ॥ गजानां शिरसि कुंभः एतदाख्यो मांसपिंडः ॥ अथच कुंभाख्यो राशिः गजस्य गकारादित्वात् शिरसश्च शकारादित्वात् ॥ तथा ॥ प्रदाने प्रकृष्टदाने वितरणे कन्या देयत्वात् ॥ अथच कन्याख्यो राशिः प्रदानस्य पकारादित्वात्॥एवं राजसंबंधिष्वेतेषु पदार्थेषु राश्यष्टकवर्णनं चित्रमत्र ॥ अवकहडाचक्रानुसारेणाऽऽदिमवर्णाऽनुरोधात्तत्तद्राशिर्भवतीति ज्योतिःशास्त्रे प्रसिद्धं ॥ ७० ॥

**गोहयगजरथकांचनमणिगणकौशेयभूनृयानानि ॥ संपूज्याऽदात्तेभ्यो वंदिभ्यो नांदिपाठकेभ्योऽयम् ॥ ७१ ॥**

गोहयेति ॥ स्पष्टं ॥ नंद्यंते आशीर्वादपूर्वकं स्तूयंते नृपादयो यस्यामितिनांदिः ॥ टुनदिसमृद्धावित्यस्मात् औणादिके इन्प्रत्यये बाहुलकादकारस्य दीर्घेऽह्रस्वांतोऽपि नांदिशब्दः ॥ ७१ ॥

**ग० ॥ अथ महेंद्रइवोपेंद्ररूपाऽऽसादितसाम्राज्यो गजेंद्रइव दानांऽबुसेकाऽऽर्द्रीकृतधरित्रीतलश्चाप इव सद्गुणो मार्गणगणभरणदक्षिणश्च विष्णुपाद इव पुण्यप्रवाहप्रवर्तको घनरसइव भुवि कीर्तिप्रसारतत्परः कुबेरइव शिवप्रीतियुक्तश्चंद्रइव चंद्रहासप्रख्यातो वर्षाऽवसरइव वाहिनीवर्धको घनइव शरवृष्टिनिपुणो गांडीवीव भीष्मसेनाविद्रावणद**

क्षो विकर्तनस्यंदनइवैकचक्रपरिचितानंतो मार्तंडइव निजश्रिया कौशिकनयननघीकरणचणः सुराऽध्वेव तारोच्चयरुचिरः पयोनिधिरिव बहूर्मिको वसंतइव माधवाऽनुकूलगुणो मिलिंदइव सुमनःसेवनाऽभिरुचिस्त्रिलोचनइव सश्रीकाऽहीनैः संसेव्यमानः सरसिजोद्भवइव सर्वतोमुखः कनकाऽचलइव महीभृदग्रेसरः क्षत्रेशाऽऽनंदप्रदोऽपि नक्षत्रेशाऽऽल्हादजनकः कृष्णसारोऽपि मृगेंद्रविक्रमः श्रितकृष्णवर्त्माऽपि सर्वतापाऽपहारकोऽकृष्णकर्माऽपि कृष्णकर्मनिरतो नृसिंहोऽप्यतिशांतमतिः कविरपि दैत्यप्रतिपक्षी क्षमाधराहीनोऽप्यशेषाऽभिख्याविराजमानः प्रत्यर्थिपृथ्वीशपृतनास्वन्वर्थनामाऽयमुग्रसेनो धराधवः परं मथुरापुरमेवाऽऽवसन् मेदिनीमंडलं परिपालयां चक्रे ॥ ४३ ॥

अथेति॥अथ अयं अभिषिक्त उग्रसेनाभिधो धराधवः पृथ्वीपतिः मथुरापुरमेव आवसन्॥उपान्वध्याङ्वसइत्याधारस्य कर्मत्वं॥परं दूरं मेदिनीमंडलं परिपालयांचक्रे॥परं उत्कृष्टं यथा तथेति क्रियाविशेषणं वा ॥ मथुरापुरमेवाऽऽवसन् इत्यवधारणेन ततो निर्गमनमंतरैव स्वप्रतापवशात् अतिदूरस्याऽपि भूवलयस्य पालनसामर्थ्यं बोधितं ॥ दूराऽनात्मोत्तमाः परा इत्यमरः ॥ कीदृश उग्रसेनो धराधवः ॥ महेंद्रइव इंद्रइव ॥ उपेंद्रेति ॥ उपेंद्रः श्रीकृष्णस्तस्य कृ-



पया आसादितं प्राप्तं साम्राज्यं चक्रवर्तित्वं येन स तथाविधः ॥ पक्षे उपेंद्रस्य वामनस्य कृपया ऽऽसादितं साम्राज्यं त्रिलोकीनायकत्वं येन सः ॥ तथा ॥ गजेंद्रइव सदामदमत्तगजश्रेष्ठइव ॥ दानांब्विति ॥ दानांबुसेकेन वितरणोदकसेचनेन ॥ पक्षे मदोदकसेचनेन आर्द्रीकृतं धरित्रीतलं पृथिवीतलं येन स तथाविधः ॥ गजेंद्रोपमया सर्वदा दानोदकाऽऽर्द्रीकृतकरत्वं सूचितं ॥ तथा ॥ चापइव धनुरिव सद्गुणः संत उत्तमा गुणाः शौर्यादयो यस्य तथाविधः ॥ मार्गणेति ॥ मार्गणानां याचकानां यो गणः समूहस्तस्य भरणे पोषणे दक्षिणो दक्षश्च ॥ पक्षे सद्गुणः सन्मौर्वीकः मार्गणगणस्य बाणसमूहस्य भरणे धारणे दक्षः ॥ मार्गणो याचके शरे इति मेदिनी ॥ मौर्व्यां द्रव्याऽऽश्रिते सत्वशौर्यसंध्यादिके गुण इत्यमरः ॥ तथा॥विष्णुपादइव विष्णोस्त्रिविक्रमभावापन्नस्य चरण इव ॥ पुण्येति ॥ पुण्यस्य शुभकर्मणो यः प्रवाहः परंपरा तस्य प्रवर्तकः ॥ पक्षे पुण्यजनकः पुण्यरूपो वा यः प्रवाहो गंगारूपस्तस्य प्रवर्तकः ॥ तथा ॥ घनरसइव उदकमिव ॥ मेघपुष्पं घनरस इत्युदकपर्यायेष्वमरः ॥ भुवि पृथ्व्यां ॥ कीर्तीति ॥ कीर्तेर्यशसः प्रसारे तत्परः ॥ पक्षे कीर्तेः पंकस्य प्रसारे तत्परः ॥ कीर्तिर्यशसि विस्तारे प्रसारे कर्दमेऽपि चेति हैमः ॥ तथा ॥ कुबेरइव धनदइव ॥ शिवेति ॥ शिवे मंगले कर्मणि प्रीतियुक्तः ॥ पक्षे शिवस्य प्रीत्या स्नेहेन युक्तः ॥ त्र्यंबकसखत्वात् ॥ तथा ॥ चंद्रइव ॥ चंद्रहासेति ॥ चंद्रहासेन खड्गेन प्रख्यातः ॥ खड्गे तु निस्त्रिंशचंद्रहासाऽसिरिष्टयइत्यमरः ॥ पक्षे चंद्रस्य हासइव शुभ्रत्वसाधर्म्याच्चंद्रहासश्चंद्रिका तया प्रख्यातः ॥ तथा ॥ वर्षाऽव-

सरइव वर्षाकालइव वाहिनीवर्धकः वाहिन्याः सेनायाः वर्धकः
संतोषदानादिना वृद्धिकर्ता ॥ यद्वा वाहिनीनां शत्रूसेनानां वर्ध-
कश्छेदकः ॥ पक्षे वाहिनीनां नदीनां वर्धकः ॥ तथा ॥ घनइव
मेघइव ॥ शरेति ॥ शराणां बाणानां या वृष्टिः शत्रूणामुपरिव-
र्षणं तत्र निपुणः॥ पक्षे शराणामुदकानां वृष्टिर्वर्षणं तत्र निपुणः॥
तथा ॥ गांडीवीव अर्जुनइव ॥ भीष्मेति ॥ भीष्मा भयंकरा या
सेना तस्या विद्रावणे दक्षः ॥ पक्षे भीष्मस्य गांगेयस्येत्यादिपूर्व-
वत् ॥ भीष्मो गांगेयभीमयोरिति मेदिनी ॥ तथा ॥ विकर्तनस्यं-
दनइव सूर्यरथइव ॥ एकेति ॥ एकेनाऽसाधारणेन स्वैकसत्ताके-
नेति यावत् एवंविधेन चक्रेण राष्ट्रेण परिचिता अनंता पृथ्वी ये-
न स तथाविधः॥आसमुद्रभूमंडलसंक्रांताऽनन्यसत्ताकराज्यइत्य-
र्थः ॥ पक्षे एकेन चक्रेण रथांगेन परिचितमनंतं आकाशं येन स
तथाविधइति ॥ सप्त युंजंति रथमेकचक्रमिति श्रुतौ एकचक्रो
रथो यस्येत्यादिना पुराणेषु च सूर्यरथस्यैकचक्रत्वं प्रसिद्धं ॥ च-
क्रं राष्ट्रेऽपीति चक्रं रथांगमिति भूर्भूमिरचला ऽनंतेति अनंतं सु-
रवर्त्म खमितिच अमरः ॥ तथा ॥ मार्तंडइव सूर्यइव ॥ निजेति ॥
निजश्रिया स्वकीयसंपत्त्या ॥ कौशिकेति ॥ कौशिकस्येंद्रस्य
नयनानां यन्नम्रीकरणं एतत्संपत्तिदर्शनप्रयुक्तलज्जावशादधःक-
रणं तेन वित्तः प्रख्यातः॥ पक्षे कौशिकानामुलूकानां यानि
नयनानि तेषां नम्रीकरणेन विख्यातः ॥ तेन वित्त इति चणप् ॥
सूर्योदयानंतरं हि तेषांदृङ्मीलनं भवतीति प्रसिद्धं ॥ अतएते
दिवांऽधपदेन व्याह्रियंते ॥ महेंद्रगुग्गुलूलूकव्यालग्राहिषु कौशि-
क इत्यमरः ॥ तथा ॥ सुराऽध्वेव सुराणामध्वा मार्गः सुरवर्त्म आ-



काश इति यावत् ॥ सइव ॥ तारोच्चयेति ॥ ताराणां शुद्धमौक्ति-
कानामुच्चयेन समूहेन रुचिरः ॥ पक्षे नक्षत्रसमूहेन रुचिरः ॥ त-
था॥ पयोनिधिरिव समुद्रइव बहूर्मिकः बह्व्यः ऊर्मिकाः अंगुली-
यकानि यस्यैवंविधः ॥ पक्षे बहुलहरीविशिष्टः ॥ शैषिकः कप् ॥
तथा ॥ वसंतः ऋतुविशेषः सइव ॥ माधवेति॥माधवस्य श्रीकृष्ण-
स्य अनुकूला गुणा भक्त्यादयो यस्यैवंभूतः ॥ पक्षे माधवे वैशा-
खे अनुकूला गुणा नानाविधपुष्पसमृध्यादयो यस्यैवंभूतः॥मा-
धवोऽजे मधौ राधे इति मेदिनी ॥ तथा ॥ मिलिंदइव भ्रमरइव ॥
सुमनःसेवनेति ॥ सुमनसां निर्मलांतःकरणानां योगिनां देवानां
वा सेवने ऽभिरुचिरभिलाषो यस्यैवंभूतः ॥ पक्षे सुमनसां पुष्पा-
णामित्यादि पूर्ववत् ॥ तथा ॥ त्रिलोचनइव शंकरइव ॥ सश्री-
केति ॥ सश्रीकाः संपत्तिमंतो ये अहीनाः उत्तमाः पुरुषा अमा-
त्यादयस्तैः सम्यक् सेव्यमानः पक्षे सश्रीकाः सविषाः ये अही-
नाः सर्पश्रेष्ठास्तैः सम्यक् सेव्यमानः ॥ तथा सरसिजोद्भवइव च-
तुर्मुखइव ॥ सर्वतोमुखः सर्वतोमुखं यस्यैवंभूतः सर्वज्ञइत्यर्थः ॥
पक्षे सर्वतश्चतसृषु दिक्षु मुखानि यस्य सः ॥ तथा ॥ कनकाच-
लइव मेरुरिव ॥ महीभृदिति ॥ महीभृतां राज्ञामग्रेसरः ॥ पक्षे म-
हीभृत्सुपर्वतेष्वग्रेसरः श्रेष्ठः ॥ एतावत्पर्यंतमुपमागर्भाण्युभयसा-
धारणानि विशेषणान्युक्त्वा इतःपरं विरोधाभासयुक्तानि विशे-
षणान्याह ॥ क्षत्रेशाऽनंदप्रदोऽपीत्यादिना ॥ तथा ॥ क्षत्रेशेति ॥
क्षत्रेशानां राज्ञां सत्कारादिना शौर्येण च आनंदप्रदोऽपि ॥ नक्ष-
त्रेशेति॥क्षत्रेशाऽऽल्हादजनको नभवतीति नक्षत्रेशाऽऽल्हादजन-
क इति विरोधाऽऽभासः ॥ नञर्थकनशब्देन समासः ॥ परिहार-

स्तु नक्षत्रेशस्य चंद्रस्याऽऽल्हादजनकस्तद्वंशोत्पन्नत्वात् ॥ यद्वा नक्षत्रेशवच्चंद्रवदाल्हादजनकः सर्वजनानामानंदजनकः ॥ तथा ॥ कृष्णसारोऽपि मृगविशेषोऽपि ॥ मृगेंद्रेति ॥ सिंहो मृगेंद्रः पंचाऽऽस्य इत्यमरात् मृगेंद्रवत् सिंहवद्विक्रमः पराक्रमो यस्यैवंविध इति विरोधाभासः ॥ परिहारस्तु कृष्णः सारो बलं यस्य स कृष्णसारइति ॥ तथा ॥ श्रितेति ॥ श्रितः कृष्णवर्त्मा अग्निर्येन स तथाविधोऽपि सर्वतापाऽपहारकः सर्वेषां तापानामपहारक इति विरोधाभासः ॥ परिहारस्तु श्रितं कृष्णस्य वर्त्म मार्गो येन सः भगवन्मार्गाऽनुयायी ॥ सर्वेषां जनानां तापस्य दुःखस्याऽपहारको नाशकइति ॥ तथा ॥ अकृष्णकर्मा न कृष्णं पापजनकमकृष्णं पुण्यजनकं कर्म यस्य स तथाविधोऽपि कृष्णकर्मनिरतः पापजनककर्मतत्पर इति विरोधाभासः ॥ परिहारस्तु कृष्णसंबंधि यत्कर्म सेवादिकं तत्र निरतः ॥ तथा ॥ नृसिंहोऽपि ना सिंहइव क्रौर्यादिगुणविशिष्टत्वादिति नृसिंहः ॥ उपमितं व्याघ्रादिभिरिति समासः ॥ यद्वा नृसिंहाऽवताररूपः ॥ एवंविधोऽपि अतिशांतमतिरिति विरोधाभासः ॥ परिहारस्तु नृषु मनुष्येषु सिंहः श्रेष्ठः ॥ उत्तरपदस्थस्य सिंहशब्दस्य श्रेष्ठवाचित्वादिति॥ तथा ॥ कविरपि शुक्रोऽपि दैत्यप्रतिपक्षी दैत्यविरोधीति विरोधाभासः ॥ परिहारस्तु कविः सूरिर्ज्ञानवानितियावत् इति ॥ कविर्वाल्मीकिशुक्रयोः॥ सूरौ काव्यकरे पुंसीति मेदिनी ॥ तथा ॥ क्षमेति ॥ क्षमायाः पृथ्व्या धरो धारको यः अहीनां सर्पाणामिनः स्वामीशेषः सोऽपि ॥ अशेषेति ॥ शेष इति या अभिख्या नाम तेन विराजमानो न भवतीत्यशेषाऽभिख्याविराजमानइति विरोधाभासः ॥ प-



रिहारस्तु क्षमाधरेषु सकलराजसु क्षांतिमत्सु वा अहीन उत्तमः ॥ यद्वा क्षमाधरः क्षमावान् हीनो न भवतीत्यहीनः ततः कर्मधारयः॥ अशेषा संपूर्णा या अभिख्या शोभा तया विराजमान इति ॥ एतावत्पर्यंतं विरोधाभासयुक्तानि विशेषणान्युक्त्वा साधारणं विशेषणमाह॥प्रत्यर्थीति॥प्रत्यर्थिनः प्रतिपक्षभूता ये पृथ्वीशा राजानस्तेषां याः पृतनाः सेनास्तासु विषये अन्वर्थं उग्रा सेना यस्येत्यर्थसहितं नाम उग्रसेनइति यस्य स तथाविधः ॥ ४२ ॥

**प०॥ पृथ्वी सस्याऽऽढ्यगर्भा समभवदनिशं पूर पूर्णास्तटिन्यो नानावर्णप्रसूनप्रकरफलभराऽऽक्रांतशाखं द्रुवृंदम् ॥ स्वे काले नीरधारावितरणनिपुणो मेघसंघस्तदानीं चातुर्वर्ण्यं स्वधर्माऽऽचरणसुमतिभृद्भृत्यवर्गोऽनुकारी ॥ ७२ ॥**

अथैतस्य सौराज्यं वर्णयति ॥ पृथ्वीति ॥ तदानीं उग्रसेनस्य निष्कंटकतया पृथ्वीपालनाऽवसरे ॥ पृथ्वी अनिशं सस्यैर्धान्यैराढ्यो गर्भो यस्या एवंविधा समभवत् ॥ अनिशं समभवदित्यनयोरुत्तरत्र सर्वत्र संबंधः ॥ तटिन्यो नद्यः पूरेण जलप्रवाहेन पूर्णाः अनिशं समभवन्निति वचनव्यत्ययः ॥ एताभ्यामन्नपानसौलभ्यं दर्शितं ॥ वनस्पत्यानुकूल्यमप्याह ॥ नानेति ॥ द्रुवृंदं वृक्षसमूहो नानावर्णेन प्रसूनप्रकरेण पुष्पसमूहेन फलभरेण चाऽऽक्रांता व्याप्ताः शाखायस्यैवंविधं ॥ एतेन सार्वदिकी पुष्पफलसमृद्धिर्दर्शिता ॥ एवं भौमाऽऽनुकूल्यमुक्त्वा उक्तत्रितयस्य हेतुभूतं दिव्यानुकूल्यमप्याह ॥ स्वेइति ॥ मेघसंघः स्वे काले वर्षाकाले ॥ पूर्वा-

द्भ्यो नवभ्योवेति विकल्पात्पक्षे स्मिनोऽभावः ॥ नीरेति ॥ वितरणं दानं ॥ एवं राज्ञः प्रतापाऽतिशयप्रतिपादकं जडवृत्तमुक्त्वा तादृशं चेतनवृत्तमाह ॥ चातुर्वर्ण्यमिति॥चत्वारो वर्णाश्चातुर्वर्ण्यं ॥ स्वार्थेष्यञ् ॥ स्वेति ॥ स्वधर्मस्याऽध्ययनादेराचरणं सुमतिर्भक्तिज्ञानोपयोगिनी बुद्धिः भक्तियुक्ततया शोभनं ज्ञानं वा ते द्वे बिभर्ति धारयतीति तथाविधं ॥ भृत्यवर्गः राज्ञोऽनुचरवर्गः अनुकारी अनुकूलाऽऽचरणशीलः ॥ स्रग्धरा वृत्तं ॥ ७२ ॥

**इदं किल कृष्णवर्त्माऽऽहितेः फलम् ॥ प० ॥ सद्वर्तिकः स्नेहपूर्ण उच्चस्थश्छत्रभृन्नरः ॥ न राजतइवोद्दीपः कृष्णवर्त्माऽऽहितिं विना ॥ ७३ ॥**

इदमिति॥इदं पूर्वोक्तैश्वर्याऽवाप्तिरूपं कृष्णवर्त्माऽऽहितेः कृष्णस्य यद्वर्त्म तस्य या आहितिर्धारणं अवलंबनमिति यावत्॥तस्याः फलं अस्ति॥किल निश्चये॥कृष्णवर्त्माहितिं विनैतादृशं फलं न भवतीति श्लेषभंग्या प्रतिपादयति॥सद्वर्तिकइति॥सत्सु सत्कर्मसु वर्तते तच्छीलः सद्वर्ती सएव सद्वर्तिकः निरंतरंसत्कर्माऽऽचरणशीलइत्यर्थः॥तथा॥ स्नेहपूर्णः स्नेहेन सर्वत्र सौहृदेन पूर्णः॥तथा॥उच्चस्थः उच्चे राजसिंहासने तिष्ठतीति उच्चस्थः॥तथा॥ छत्रभृत् छत्रं बिभर्तीति च्छत्रभृत्॥ एवंविधोऽपि नरः कृष्णवर्त्माऽऽहितिं विना कृष्णमार्गाऽऽश्रयणं विना न राजते न शोभते ॥ कइव ॥ सद्वर्तिकः सत्य उत्तमा वर्त्तयो दशा यस्मिन्सः स्नेहेन तैलेन पूर्णः उच्चस्थः उच्चदीपिका-





स्थितः छत्रभृत् दीपोपरि कज्जलधारणाय छत्राऽऽकृति यत् स्थापयंति तच्छत्रं तद्बिभर्तीति छत्रभृत् एवंविध उत्कृष्टो दीपइव ॥ कृष्णवर्त्मनोऽग्नेराहितिमाधानं विना दीपो यथा नराजते नप्रकाशते तद्वत् ॥ ७३ ॥

**यश्चैवं द्विजतामवाप्य गुरवे दत्वेप्सितां दक्षिणां कुब्जाया व्रजयोषितां समलुनात्तापं भृशं त्वद्गतं ॥ यः श्रीद्वारवतीं प्रविश्य सबलो लीलाः सुकुर्वन् सदा श्रीमद्गोकुलएव तिष्ठतिसुखं सोऽव्यान्नईशो निजान् ॥ ७४ ॥**

इतः परमवशिष्टा भगवल्लीलाः संक्षेपेण वर्णयन्नाशिषं प्रार्थयते॥ यश्चैवमित्यादिश्लोकैः ॥ सः ईशः प्रभुः श्रीकृष्णः निजान् स्वकीयान्नः अस्मानव्यात् रक्षतात् ॥ सकः ॥ यश्च एवं पूर्वोक्तलीलाकरणवत् द्विजतां द्विजतापादकोपनयनाख्यसंस्कारेणद्विजत्वं अवाप्य प्राप्य॥उक्तंच॥जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते इति ॥ गुरवे सांदीपिन्याख्याय ईप्सितामभीष्टां मृतस्य पुत्रस्य पुनरानयनपूर्वकं समर्पणरूपां दक्षिणां दत्वा कुब्जायाः व्रजयोषितां गोपीनां च त्वद्गतं भृशमत्यंतं तापं विरहप्रयुक्तं खेदं सम्यक् अलुनात् छेदितवान् निवारयामासेत्यर्थः ॥ तत्र कुब्जायाः स्वयं तद्गृहगमनपूर्वकं स्वसंभोगादिदानेन गोपीनां तूद्धवद्वारा स्वसंदेशकथनेन बलरामरूपेण स्वस्यैव गोकुलगमनेन कुरुक्षेत्रयात्रायां स्वयमेव तत्वोपदेशेन च त्वत्तापनिवारणं कृतवानिति भावः॥ बलरामरूपेण भगवतएव गोकुले गमनमिति स्फुटीकृतं सुबोधिन्यां

श्रीमद्वल्लभाचार्यैः॥यश्च सबलो बलरामसहितः ससैन्यश्च श्रीद्वारवतीं श्रीद्वारकां प्रविश्य लीलाः सुष्ठु कुर्वन्नपि सदा श्रीमद्गोकुले एव सुखं यथा स्यात्तथा तिष्ठति ॥ श्रीद्वारकाप्रवेशपूर्वकलीलाकरणस्य सर्वदा गोकुलस्थितत्वस्य च युगपद्वर्णनं वर्तमानकालनिर्देशश्च नित्यलीलाऽभिप्रायेण विरुद्धधर्माऽऽश्रयत्वाऽभिप्रायेण च ॥ एतदुपपत्तिश्च विद्वन्मंडनादितो ऽवगंतव्या ॥ शार्दूलविक्रीडितं वृत्तं ॥ ७४ ॥

**गोत्रत्रच्छत्रसत्राणपवित्राऽखर्वगर्वकृत् ॥ गोवर्धनधरः सोऽव्यान्निजानां नंदनद्रुमः॥ ७५॥**

अथ मंगलादीनि मंगलमध्यानि मंगलांतानि प्रथंते शास्त्राणीत्यभियुक्तोक्तेर्यथांते स्वेष्टदेवतास्वरूपत्रयकीर्तनपुरस्सरमाशीरूपं मंगलमाचरति॥गोत्रत्रेत्यादिश्लोकत्रयेण॥तत्र प्रथमं स्वमार्गे ऽत्यंतप्रधानं स्वयं व्यक्तं श्रीनाथस्वरूपं वर्णयति॥गोत्रेति ॥सः लोकवेदप्रसिद्धः गोवर्द्धनधरः श्रीनाथः स्वीयान् इति शेषः॥अव्यात्॥कीदृशः॥ गोत्रान् पर्वतान् त्रायते इति गोत्रत्रो गिरिराजो गोवर्धनः सएव च्छत्रं तेन सतां व्रजभक्तानां यत् त्राणं रक्षणं तेन कृत्वा पवि वज्रं त्रायते पविना वा लोकांस्त्रायते इति पवित्रो वज्रधारको वज्रेण लोकरक्षकोवा इंद्रस्तस्याखर्वो ऽनल्पो यो गर्वस्तं कृंततीति तथाविधः॥तथा ॥ निजानां स्वीयानां नंदनद्रुमः कल्पवृक्षः॥ अभीप्सितफलप्रदातेत्यर्थः ॥ एतेन सर्वविघ्नाऽपहरणपूर्वकं स्वभक्तानां रक्षणे सर्वमनोरथपूरणे च सामर्थ्यं दर्शितं ॥ ७५ ॥

**करतलधृतनवनीतं छायाभीतं सुमुग्धभाववशात्॥ स्फीतं कविभिर्गीतं प्रियनवनीतं प्रभुं वंदे ॥ ७६ ॥**



अथ स्वमार्गीयमुख्यरूपेषु सप्तसु नवनीतप्रियेतिप्रसिद्धस्वरूपस्य स्वपारंपरिकप्रभुत्वं स्वस्य तद्वशत्वं च ध्वनयितुं तत्स्वरूपमभिवादयते ॥ करतलेति ॥ अहमिति शेषः ॥ प्रियनवनीतं प्रियं नवनीतं यस्य तथाविधस्तं नवनीतप्रियाख्यं प्रभुं वंदे ॥ कीदृशं ॥ करेति॥ स्पष्टं ॥ करोऽत्र दक्षिणः ॥ सुतरां यो मुग्धभावो बाल्यं तद्वशात् छायाभीतं स्वस्य स्वेतरस्य वा छायायाः सकाशात् भीतं॥ अथ लोकसाधारणंमुग्धत्वं वारयितुं विशेषणांतरमाह ॥ स्फीतमिति॥ कविभिः शुकप्रभृतिभिः स्फीतं बहुलं यथातथा गीतं॥ पथ्याऽऽर्या वृत्तं ॥ ७६ ॥

**बालकृष्णचरणोत्पले ऽमलं मानसं वसति निर्मलं चलम्॥ दृष्टमस्ति किल तत्र तत्कुलं चित्रमत्र तु विलोमताऽस्त्यलम्॥ ७७॥**

अथ स्वस्य सेव्यत्वेन प्राप्ते श्रीमदाचार्यसेविते श्रीबालकृष्णाख्ये स्वरूपे स्वमनोनिधानं श्लेषमूलकचित्रप्रदर्शनपूर्वकं वर्णयति ॥ बालकृष्णेति ॥ ममेति शेषः ॥ मम चपलमपि मानसं अंतःकरणं अमलं लौकिककामादिशून्यं सत् बालकृष्णस्य चरणमेव उत्पलं तस्मिन् वसति ॥ चित्रमेतत् ॥ चित्रमेवोपपादयति ॥ दृष्टमिति ॥ यतः तत्कुलं तेषामुत्पलानां कुलं समूहस्तत्र मानसे सरसि दृष्टमस्ति किल प्रसिद्धं ॥ कमलनिष्ठाऽऽधेयतानिरूपितमाधारत्वं मानसे प्रसिद्धमिति भावः ॥ अत्र तु श्रीबालकृष्णपद-

तादात्म्यापन्नकमलमानसयोर्विषये तु अलमत्यर्थं विलोमता मानसनिष्ठाऽऽधेयतानिरूपिताऽऽधारत्ववत्कमलमित्येवंरूपं वैपरीत्यं अस्तीति ॥ वर्णनप्रभावेण स्वमानसस्य तच्चरणकमलाभिनिविष्टत्वं स्फुटीकृतं ॥ इह मानसपदेन अंतःकरणस्य सरसश्चाऽभेदाऽध्यवसायः ॥ रथोद्धत्ता वृत्तं ॥ रो नराविह रथोद्धता लगाविति तल्लक्षणात् ॥ ७७ ॥

**श्रीमदग्निकुलसंभवं विभुं वल्लभं तमतिदुर्लभं नुमः॥ हल्लकं चरणरूपकं सदा शल्यकं निगमवर्त्मविद्विषाम्॥ ७८ ॥**

अथ स्वाऽऽचार्यान् स्तौति ॥ श्रीमदिति ॥ वयमिति शेषः ॥ वयं तं वल्लभं नुमः स्तुमः ॥ कीदृशं ॥ श्रीमत् यदग्निकुलं ब्राह्मणकुलं॥ ब्राह्मणानां भगवन्मुखरूपत्वादग्नेश्च तदधिदैवतत्वादग्निशब्देन ब्राह्मणो लक्ष्यते ॥ तस्मिन्संभव उत्पत्तिर्यस्य तं यद्वा अग्नेः कुलं गृहं तस्मात्संभव उत्पत्तिर्यस्य तं ॥ श्रीमद्वल्लभाचार्याणामग्निकुंडादुत्पत्तिर्लोके स्वमार्गीयग्रंथेषु च प्रसिद्धा ॥ मुख्यार्थस्तु अग्नेर्भगवन्मुखाधिष्ठात्रानंदरूपस्य कुलं गृहं भगवन्मुखं तस्मात्संभवो भगवदाज्ञया अवतरणं यस्य ॥ एतच्च सुबोधिनीभाष्यादौ तैरेव ध्वनितं ॥ पुराणादौ च प्रसिद्धं ॥ तथा ॥ विभुं निग्रहाऽनुग्रहसमर्थं ॥ तथा ॥ अतिदुर्लभं अभक्तिमतामित्यर्थः ॥ यद्वा तद्दर्शनार्तिजनितदुःखेन लब्धुं शक्यमित्यर्थः ॥ तं कं ॥ यस्येति शेषः॥ यस्य चरणरूपमेव चरणरूपकं ॥ स्वार्थेकः ॥ हल्लकं रक्तवर्णं संध्याविकासि कमलं ॥ हल्लकं रक्तसंध्यकमित्यमरः ॥ निगमेति॥



वेदमार्गद्वेष्टृणां सदा शल्यकं शल्यमेव शल्यकं बाणाग्रं तद्वद्वेधकं अस्ति ॥ रथोद्धता वृत्तं ॥ ७८ ॥

**शश्वद्धर्मभृतां मृदुप्रवचसां जेता यशस्संपदा श्रीमद्वल्लभनंदनाऽन्वयसुधाराशिः प्रकाशी सदा॥ राजत्कृष्णपदाऽरविंदयुगलाऽभ्याशे धृताशो हृदा सोऽयं मोहमयीपुरे विजयते गोवर्धनेशो मुदा॥ ७९ ॥**

मंत्रोपदेष्टृतया गुरून् धर्मपितृचरणान् गोवर्धनाभिधान् गोस्वामिविशेषान् वर्णयति ॥ शश्वदिति ॥ सः प्रसिद्धः अयं सर्वदा चिंतनीयत्वेन निकटवर्ती गोवर्धनेशो मोहमयीपुरे लोके मुंबईतिप्रसिद्धे नगरे विजयते सर्वोत्कर्षेण वर्तते ॥ वर्त्तमानप्रयोगस्तु स्वमते प्रपंचस्य नित्यत्वात् गुरोर्भगवद्रूपत्वेन सर्वदा विद्यमानत्वाच्च ॥ कीदृशो गोवर्धनेशः ॥ शश्वत् निरंतरं यशःसंपदा स्वीयकीर्तिसंपत्त्या मृदुप्रवचसां मृदु प्रियं प्रकृष्टं हितं सत्यं च वचो येषां ते मृदुप्रवचसस्तेषां ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥ स्वाध्यायाऽभ्यसनं चैव वाङ्मयं तप उच्यते इति गीतावाक्यानुसाराद्वाङ्मयतपोयुक्तानामित्यर्थः ॥ एवंविधानां धर्मभृतां धार्मिकाणां जेता तेषां मध्ये श्रेष्ठ इत्यर्थः ॥ तथा ॥ श्रीमदिति ॥ श्रीमद्वल्लभनंदनस्य श्रीविठ्ठलेशस्याऽन्वयो वंशस्तस्य सुधाराशिः आल्हादजनकत्वाच्चंद्रः एवंविधोऽपि सदा प्रकाशोऽस्याऽस्तीति प्रकाशी॥एतेन प्रसिद्धचंद्रवैलक्षण्यं॥तथा॥हृदा अंतःकरणेन मुदा हर्षेण॥राजदिति॥राजच्छोभमानं यत्कृष्णस्य बालकृष्णस्य पदार-

विद्युगलं तस्याऽभ्याशे समीपे धृताशो धृताऽभिलाषः ॥ एतेन सदा सहर्षं भगवत्सेवनचिंतनपरत्वं वर्णितं ॥ शार्दूलविक्रीडितं वृत्तं ॥ ७९ ॥

तर्क्कैकर्कशताप्रपन्नधिषणः काव्येषु शौंडाऽग्रणी
रुद्यद्वल्लभवर्त्मवादविभवग्रंथेष्वभिज्ञोत्तमः ॥ वि
द्वद्वर्यविभाषिताऽतिसुयशस्सौशील्यरत्नाकरः स
च्छास्त्रे रतिमावहन् विजयतां सद्वैद्यनाथाऽभि
धः॥ ८० ॥

अथाऽध्यापयितृगुरुविजयमाशास्ते ॥ तर्कैइति ॥ सद्वैद्यनाथाभिधः विद्याऽस्ति येषां ते वैद्या विद्यावंतस्तेषां नाथो वैद्यनाथ इति अभिधा नाम यस्य स विद्याप्रदो गुरुः सच्छास्त्रे पाखंडादिरहिते उत्तमशास्त्रे रतिं प्रीतिमावहन् धारयन् सन् विजयतां सर्वोत्कर्षेणवर्ततां ॥ कीदृशः ॥ तर्कै तर्कशास्त्रे विषये ॥ कर्कशतेति ॥ कर्कशतां प्रपन्ना प्राप्ता कर्कशताप्रपन्ना ॥ द्वितीयेति योगविभागात्समासः ॥ अथवा प्रपन्ना प्राप्ता कर्कशता यां सा कर्कशताप्रपन्ना ॥ आहिताग्न्यादित्वान्निष्ठांतस्य परनिपातः ॥ एवंविधा धिषणा बुद्धिर्यस्य सः ॥ तथा ॥ काव्येषु विषये शौंडाग्रणीः शौंडा विख्यातास्तेषामग्रणीः विख्याततम इत्यर्थः ॥ शौंडो मत्ते च विख्याते इति मेदिनी ॥ तथा ॥ उद्यदिति ॥ उद्यंतः प्रकटीभवंतो ये वल्लभवर्त्मनः श्रीवल्लभाचार्यप्रकटीकृतमार्गस्य संबंधिनो वादविभवविशिष्टा ग्रंथास्तेषु अभिज्ञोत्तमः ॥ तथा॥विद्वदिति ॥ विद्वद्वर्यैर्विद्वच्छ्रेष्ठैर्विशेषेण भाषिते प्रतिपादिते अति अत्यंते सुयशः



सौशील्ये तयो रत्नाकरइवेति तथाविधः ॥ इहापि शार्दूलविक्रीडितं वृत्तं ॥ ८० ॥

युग्मं ॥ तुष्ट्यै कवेर्हि दर्पो नाऽस्ति सुमनसामतस्त
मुज्झित्वा ॥ सद्गुरुकृपाप्रभावात्तेषां तस्यै मया तु
बालधिया ॥ ८१ ॥ संग्रथितेऽत्र निबंधे रसिकैः
काव्यज्ञशिक्षितैर्निपुणैः ॥ संशोध्यं शोध्यं चेदेतद्बो
ध्यं नचेतरैर्विबुधाः ॥ ८२ ॥

अथ कवित्वविषयकदर्पाऽभावबोधनपुरःसरं सूक्तासूक्तविचारविषये विबुधानभिमुखीकृत्य प्रार्थयते ॥ तुष्ट्यै इत्यादिश्लोकद्वयेन ॥ हेविबुधाः विशेषेण ध्वनिमर्मज्ञा विद्वांसः हि यतः कवेः काव्यकर्तुर्दर्पः कवित्वप्रयुक्तोगर्वः अथच दैत्यपक्षपातिनः शुक्रस्य गर्वः सुमनसां पंडितानां अथच देवानां तुष्ट्यै नाऽस्ति संतोषाऽऽधायको न भवति ॥ अतस्तं कवित्वप्रयुक्तं गर्वं उझ्झित्वा त्यक्त्वा बालधिया बालवदप्रगल्भबुद्धिना मया ॥ सदिति ॥ सद्गुरूणां मोक्षमंत्राद्युपदेशकानां अथच देवपक्षपातितया सतो गुरोर्बृहस्पतेः कृपायाः प्रभावात् ॥ अनेन बालबुद्धित्वेऽपि ग्रंथकरणसामर्थ्यं गुरुकृपाप्रभावहेतुकमेवेति सूचितं ॥ तेषां सुमनसां तस्यै तुष्ट्यै तुरवधारणार्थः संतोषायैव संग्रथिते अत्र अस्मिन् निबंधे चेत् यदि शोध्यं शोधनार्हं किंचिद्भवेत्तर्हि रसिकैः काव्यज्ञशिक्षितैः निपुणैः भवद्भिरिति शेषः सम्यगमात्सर्येण शोध्यं इतरैः रसिकत्वादिविशेषणत्रयवर्जितैर्नच शोध्यं नैव शोधनीयं एतत् बोध्यं ज्ञातव्यं ॥ अथवा रसिकत्वादिविशेषणत्रयसहितैरेव कि-

मर्थमिदं शोध्यमित्याशंकायामाह ॥ एतदिति ॥ एतत्काव्यवस्तु इतरैरुक्तविशेषणत्रयरहितैर्नच बोध्यमर्थज्ञानपुरःसरं नैव बोद्धुं शक्यं ॥ अत्र रसिकैरित्यनेन स्वाभाविकी काव्यकरणशक्तिरुक्ता ॥ तस्य नीरसैः कर्तुमशक्यत्वात् ॥ निपुणैरित्यनेन लोकशास्त्रकाव्याद्यवेक्षणप्रयुक्तं चातुर्यं संगृहीतं ॥ काव्यज्ञशिक्षितैरित्यनेन काव्यज्ञशिक्षया ऽभ्यासोऽपि ॥ एवंच शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ॥ काव्यज्ञशिक्षया ऽभ्यास इति हेतुस्तदुद्भवे इति काव्यप्रकाशाद्युक्तसमग्रकाव्यसामग्रीसंपन्नैः सत्कविभिरेवैतच्छोध्यमित्युक्तं भवति ॥ ८१ ॥ ८२ ॥

**गोरसमेतं गोरसलिप्सोर्लीलासुशर्करामिष्टम् ॥**
**रसिकाः पिबंतु तुष्ट्यै पुष्ट्यै सौवर्णपात्रस्थं ॥ ८३ ॥**

अथ रसिकान् प्रति एतद्ग्रंथसेवनं कर्तव्यमिति प्रार्थयते ॥ गोरसमिति ॥ रसिकाः एतं चंपूरूपं गोरसं गोः वाण्याः रसं अथच दुग्धादिरूपं तुष्ट्यै संतोषाय पुष्ट्यै भगवल्लीलानां पोषाय यद्वा श्रीमद्वल्लभाचार्यप्रकटितं पुष्टिमार्गं लब्धुं च पिबंतु ॥ क्रियार्थोपपदस्येत्यादिना चतुर्थी ॥ दुग्धादिरसपानेनाऽपि संतोषशरीरपोषौ प्रसिद्धौ ॥ स्वतो मधुरस्याऽपि गोरसस्य मधुरतरत्वबोधनाय विशेषणमाह ॥ गोरसलिप्सोरिति ॥ गोरसलिप्सोः श्रीकृष्णस्य ॥ लीलेति ॥ लीला एव शोभना अविकृता शर्करा तया कृत्वा मिष्टं मधुरं ॥ प्रसिद्धशर्करावैलक्षण्यद्योतकः सुशब्दः ॥ ग्रंथस्य गोरसरूपत्वात् भगवतश्च गोरसलिप्सुत्वाद्भगवत्प्रियत्वं ग्रंथस्य सू-





चितं ॥ एतादृशाऽत्युत्तमपदार्थस्य पाने साधनभूतमुत्तमं पात्रमपि विशेषणेन दर्शयति ॥ सौवर्णेति ॥ शोभना मार्दवादिगुणविशिष्टा भगवद्वर्णनोपयुक्तत्वाद्वा शोभना येवर्णाः अक्षराणि सुवर्णास्तएव सौवर्णाः ॥ स्वार्थिकःप्रज्ञाद्यण् ॥ तएव पात्राणि तेषु सम्यक् तिष्ठतीति तथाविधं ॥ अथच स्वर्णमयपात्रस्थितं ॥ ८३ ॥

**युग्मं ॥ गुणशशिनंदधरित्रीमितवर्षे वैक्रमे तु वै क्रमतः ॥ मास्याश्विने हि घस्रे प्रथमे पक्षे शुभे च भौमयुते ॥ ८४ ॥**

अथ मातुरपि मातृदेवोभवेति श्रुतिबोधितदेवतात्वात्तन्नामकीर्तनपूर्वकं ग्रंथसमाप्तिं युग्मेन प्रतिपादयन्नादौ समाप्त्यधिकरणकालं प्रतिपादयति ॥ गुणेतिश्लोकेन ॥ वैक्रमे विक्रमस्य राज्ञः इदं वैक्रमं तस्मिन् ॥ गुणास्त्रयः ३ शशी एकः १ नंदा नव ९ धरित्री एकः १ एतेषां द्वंद्वे अंकानां वामतोगतिरित्युक्तेस्त्रयोदशाऽधिकैकोनविंशतिशतानि १९१३ तैर्मिते परिच्छिन्ने वर्षे वत्सरे आश्विने मासे शुभे पक्षे शुक्लपक्षे भौमेन मंगलेन युते प्रथमे घस्रे दिवसे प्रतिपदीत्यर्थः ॥ क्रमतः क्रमेण ॥ वै पादपूरणे ॥ ८४ ॥

**पद्मावतीगर्भभुवा मया ऽद्य पद्मापतेर्भूरिकृपाबलेन ॥ श्रीबालकृष्णादिमशब्दचंपूः संपूरितेयं ननु जीवनेन ॥ ८५ ॥ इति श्रीमद्बालकृष्णपदेंदीवरमिलिंदायमानश्रीमद्गोकुलोत्सवाऽऽत्मजजीवनजीशर्मणा विरचितोऽयं श्रीमद्बालकृष्णचंप्वाख्यप्रबं**

धस्समाप्तिमटीकत॥ ॥ श्रीमद्गोपीजनवल्लभः प्रसन्नोस्तु॥

पद्मावतीति॥अथ पद्मावतीगर्भभुवा मया जीवनेन जीवनाख्येन कविना पद्मापतेर्लक्ष्मीपतेः श्रीकृष्णस्य अथच नामैकदेशे नामग्रहणमितिन्यायात्पद्माशब्देन पद्मावती तस्याः पतिः श्रीविठ्ठलेशस्तस्य श्रीमद्वल्लभाचार्यतनयस्य ॥ तत्परिग्रहस्याऽपि पद्मावतीत्यभिधानात् ॥ अथच स्वपितुः श्रीमद्गोकुलोत्सवस्य भूरिकृपाबलेन इयं ॥ श्रीति ॥ श्रीयुक्ता बालकृष्णइत्यादिमः शब्दो यस्या एवंविधा याचंपूर्गद्यपद्यमयं बालकृष्णचंप्वभिधं काव्यं संपूरिता समाप्तिं नीतेति शिवम् ॥ इंद्रवज्रावृत्तं ॥ ८५ ॥ सोऽव्याद्विरूपाक्षमिभाऽननः स्वं संद्रष्टुमायांतमवेक्ष्य बाल्यात् कुंदाऽवदातैकरदाऽपदेशाद्धास्यांऽकुरं यः प्रकटीचकार ॥ १ ॥ गोदादक्षिणतीरराजदमलश्रीनासिकाख्याऽतुलक्षेत्राऽऽवासविधायिना तनुभुवा नारायणस्य त्वियं ॥ लक्ष्मीगर्भभुवा मया विरचिता खाडिलकरोपाख्यकेनाऽऽत्मारामसमाह्वयेन विवृतिस्तुष्यंतु संतोऽनया ॥ २ ॥ नयन २ वसु ८ मुनि ७ क्ष्मा १ संमिते १७८२ रौद्रशाके स्वर ७ कु १ नव ९ रसा १ युग्वैक्रमाब्दे १९१७ च मासे ॥ सहसि वदिदले नंदाख्यतिथ्यां च मंदे विवृतिरवसितेयं जीवनेशप्रसादात् ॥ ३ ॥ वेदांतव्याकृतिच्छंदोधर्मसाहित्यमर्मभित् ॥ घनश्यामतनूजन्मा कृती गोवर्धनः कविः ॥ ४ ॥ तर्कवेदांतसाहित्यधर्मपाथोधिमंदरः ॥ लब्धवर्णोवैद्यनाथःकविश्श्रेमौ सुहृद्वरौ ॥ ५ ॥ स्निग्धया ऽनयतां दृष्ट्या दोषानुद्धृत्य सर्वशः ॥ रसिकास्वाद्यतामेतां मत्कृतां विवृतिं शिवम् ॥ ६ ॥ अधिकं दुरुक्त्मत्राऽनुक्तं सम्यग्विचार्य विद्वांसः ॥ अपसारणसमकरणाऽऽपूरणविषये स्थ सादरा यूयं ॥ ७ ॥ इति श्रीमत्परमहंसपरिव्राजकाऽऽचार्यतारकब्रह्मानंदसरस्वतीचरणकमलमिलिदायमानमानसेन नारायणतनुजनुषा लक्ष्मीगर्भसंभवेन खाडिल्करोपाभिधेनाऽऽत्मारामेण रचिता श्रीबालकृष्णचंपूव्याख्या मंजर्यभिधा समाप्तिमगमत् ॥ श्रीकृष्णायनमः॥